Samskrita Avatara Series No. II

श्रीः

SANSKRIT THIRD READER

BY

Pandit, V. R. T. TATACHARIAR
Senior Sanskrit Teacher
Board High School, Nannilam

नन्निलवर्त्याङ्गलकलाशालाप्रधानसंस्कृताध्यापकेन

श्रीशैलताताचार्येण

विरचितः

॥ संस्कृतावतारः ॥

(तृतीयो भागः)

THE INDIAN PUBLISHING HOUSE LTD.,
MADRAS

Price 6 Annas] 1926

Samskrita Avatara Series No. II

श्रीः

SANSKRIT THIRD READER

BY

Pandit, V. R. T. TATACHARIAR
Senior Sanskrit Teacher
Board High School, Nannilam

नन्निलवर्त्याङ्गलकलाशालाप्रधानसंस्कृताध्यापकेन
श्रीशैलताताचार्येण
विरचितः

॥ संस्कृतावतारः ॥

(तृतीयो भागः)

THE INDIAN PUBLISHING HOUSE LTD.,
MADRAS

Price 6 Annas]	1926	

॥ श्रीः ॥

॥ संस्कृतावतारः ॥

[तृतीयो भागः]

वन्दे बृन्दावनचरं वल्लवीजनवल्लभम् ।
जयन्तीसंभवं धाम वैजयन्तीविभूषणम् ॥

LESSON I (प्रथमः पाठः)

ध्रुवः ।

पुरा मनोस्सन्ततावुत्तानपाद इति कश्चन नृपतिरासीत् । तस्य सुनीतिरिति सुरुचिरिति च द्वे भार्ये आस्ताम्। सुनीत्यां सुरुच्यां च राज्ञः क्रमेण ध्रुव उत्तमश्च समभवत् । सुरुच्यामुत्तमे च राज्ञः प्रीतिरतीवावर्तत । सुनीत्यां ध्रुवे च राज्ञस्तथा प्रीतिर्नासीत् । कदाचित्सिंहासनारूढस्य राज्ञ उत्सङ्गमाश्रितं भ्रातरमुत्तमं दृष्ट्वा ध्रुवोऽपि तमारोढुमभिलषति

स्म। अथ राजा निजाङ्कारोहणे समुत्सुकं ध्रुवं सुरुच्याः समक्षं नाभ्यनन्दत्। तदनु सुरुचिर्ध्रुवं प्रत्येवमब्रवीत्, "वत्स, चक्रवर्तिनः पितुः स्थानमिदं न राजपुत्रमात्रेण लब्धुं शक्यम्। मद्गर्भसंभवभाग्यादेव तल्लभ्यम्। अतस्तवायमलभ्याभिलाषो वृथे" ति। ध्रुवस्तद्वाक्यमाकर्ण्य कुपितः पितरमुत्सृज्य मातुर्मन्दिरमगमत्। सुनीतिरात्मजं कोपात्प्रस्फुरिताधरमालोक्य "किं ते कोपकारणमि" ति पर्यपृच्छत्। स च तस्यै यथावृत्तमकथयत्। सा तु तद्वाक्यं निशम्यातीव विषण्णा तनयं प्रत्येवमवदत्, "सुरुचिस्सत्यमेवाब्रवीत्। स्वल्पपुण्यस्त्वं मम पुत्रो जातः। दैवेन यावत्स्वस्मै दत्तं तावतैव धीमांस्तुष्यति। अतस्त्वं दुःखितुं नार्हसि। यदि दुःखं सोढुमशक्यं, तर्हि कुरु पुण्यसंपादनाय यत्नमि" ति। एवमभिहितो ध्रुवः पितुरप्यलभ्यं स्थानमवाप्तुकामः पुरान्निर्गत्य नगरोपवनस्थान्स्वानुग्रहाय समागतान्सप्तर्षीनालोक्य तान्सर्वानपि प्रणिपत्येत्थमभाषत, "भगवन्तः, दासोऽहमुत्तानपादतनयो ध्रुवनामा सपत्नीमात्रा परिभूतः श्रीमतां सकाशमधिगतवानस्मि। नाहं तातस्य राज्यं भोक्तुमिच्छामि। अन्येनाभुक्तं स्थानमवाप्तुमिच्छामि। तदुपायमुपदिशन्तु भवन्त" इति। एवं प्रार्थितास्ते मुनयस्तत्कूटस्थस्य मनोर्जपेन, अनितरसुलभामृद्धिमापादितवन्तं मन्त्रं तस्मै समुपदिश्य, "एतज्जपेन

सर्वफलप्रदानचतुरं विष्णुमाराधय । प्रसन्नो विष्णुस्त्वदभिमतं दास्यती" ति कथयित्वा यथाऽऽगतमगच्छन् । अथ ध्रुवो विष्णौ समाहितमनास्तपसो भीतैर्देवैः पुत्रक्लेशमसहमानया जनन्या च कृतसमाधिभङ्गोऽप्यचलन्मन्त्रमावर्तयामास। तदनु जपजनिताग्निदाहभीतैर्देवैरभ्यर्थितो भगवान्ध्रुवसमीपमुपेत्य "आश्चर्येण तव तपसा तोषितोऽस्मि । वरं वृणीष्वे" त्यकथयत् । स तून्मीलिताक्षः शङ्खचक्रादिना विलसन्तं भगवन्तमालोक्य विस्मितः पञ्चवर्षीयत्वात्स्तुतिप्रकारमजानंस्तदीयशङ्खस्पर्शादधिगतस्तवनशक्तिः श्रोत्रसुखैः स्तोत्रैस्तं स्तौति स्म । अथ ध्रुवः प्रसन्नेन भगवता नक्षत्रादीनामुपरि यथाभ्यर्थनं व्योम्नि परिकल्पितं स्थानमासाद्य विमाने तारकारूपेण स्थितया सन्निहितया जनन्या सह ततः प्रभृति सुखं वसति ॥

LESSON II (द्वितीयः पाठः)

मार्कण्डेयः ।

पुरा मृकण्डुनामा महामुनिरनपत्यः सभार्यस्तपसा शङ्करमतोषयत् । तस्य तपसा सन्तुष्टः पिनाकी प्रत्यक्षीभूय "मत्तो वरं गृहाणे" त्यब्रवीत् । तदा मृकण्डुः "अनप

त्योऽहं पुत्रमिच्छामी" ति विज्ञापयति स्म । दयानिधिरीश्वरः "किं त्वं निर्गुणं चिरजीविनं पुत्रमिच्छसि ? आहोस्वित्सुगुणं सर्वज्ञं षोडशवर्षायुषं सुतमि" त्यपृच्छत् । मुनिस्तु "नाहमिच्छामि निर्गुणं सुतम् । अल्पायुरपि पुत्रस्सर्वज्ञोऽस्त्वि" ति तं प्रार्थयामास । तदनु शङ्करः "षोडशायुर्धार्मिकस्सर्वज्ञस्सुतस्ते भविष्यती" त्युक्त्वाऽन्तरधात् । गतेषु केषुचिद्वर्षेष्वन्तर्वत्नी मरुद्वतीनाम्नी तस्य पत्नी तपनाकारं तनयमसूत । मृकण्डुः प्रीत्या समागतैर्वेदव्यासादिभिः सह जातस्य जातकर्मादिकमकरोत् । व्यासादयश्च तं बालमाशीर्भिरभिनन्द्य बालोचितां रक्षामकुर्वन् । जनास्सर्वेऽपि बालस्य रूपादिकमालोक्यातीव विस्मिता बभूवुः । मृकण्डुस्तु यथाकालं तमुपनीय साङ्गान्वेदानध्यापयामास । अथ कदाचिन्मृकण्डुश्शोकाद्विलपति स्म । मार्कण्डेयो विलपन्तं पितरं दृष्ट्वा "शोकस्य किं कारणमि" त्यपृच्छत् । पिता तु पुत्रस्य मधुरं वाक्यमाकर्ण्य,

"आयुष्षोडश वर्षाणि तव दत्तं पिनाकिना ।
स कालोऽयमिह प्राप्तस्तस्माच्छोचामि नन्दन ॥"

इत्यवदत् । मार्कण्डेयस्तातस्य वचनं निशम्य "मृत्युंजयं महादेवमहं समाराध्यामर्त्यतां यास्यामि । ततो मन्निमित्तं शोकं कदाचिदपि तातो मा वहत्वि" त्यवोचत् । तदा तनयवचनं श्रुत्वा हृष्टौ पितरौ,

"आवयोश्शोकनाशाय महोपायस्समीरितः ।
प्रयाहि विश्वशरणं विश्वरक्षामणिं शिवम् ॥"

इत्यवदताम् । मार्कण्डेयः सद्यः पित्रोरनुज्ञामवाप्य दक्षिणार्णवरोधसि निजाह्वयं लिङ्गं संस्थाप्य कालत्रयेऽपि स्नात्वा शिवमाराध्य पूजान्ते चन्द्रशेखराष्टकादिस्तोत्रं पठित्वा नृत्यन्नासीत्। अत्रान्तरे भयङ्कराकारो यमस्समागत्य शिवस्तवोद्यतं मार्कण्डेयमुद्दिश्य पाशं प्राक्षिपत्। कण्ठार्पित-महापाशो मार्कण्डेयः कालमिदमब्रवीत् ।

मार्कण्डेयः—

काल! तावत्प्रतीक्षस्व कालं मम महामते ।
निर्वर्तयाम्यहं यावन्महास्तोत्रं जगत्पतेः ॥

कालः—

पूर्वे वयसि यो धर्मं न करोति विमूढधीः ।
स पश्चात्तप्यते वृद्धस्सार्थभ्रष्ट इवाध्वगः ॥
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते कालः कृतमस्य न वा कृतम् ॥

मार्कण्डेयः—

येऽत्र विघ्नं प्रकुर्वन्ति शिवस्तोत्ररतात्मनाम् ।
तेऽचिरेण विनश्यन्ति त्वामतो वारयाम्यहम् ॥
न मृत्युर्न तथा धाता न यमो यमदूतकाः ।
न चान्ये शिवभक्तानां भवन्ति प्रभविष्णवः ॥

कालः—

यावत्य एव गङ्गायां सिकता विप्र दुर्मते ।
तावन्त एव ब्रह्माणो मया कालेन संहृताः ॥
किं वाऽत्र बहुनोक्तेन पश्य मे विक्रमं बलम् ।
स पातु त्वां महादेवो यस्य दासोऽसि सांप्रतम् ॥

एवमुक्त्वा रोषाविष्टः कालः स्वर्भानुश्चन्द्रमिव मार्कण्डेयं हठाद्ग्रसितुमारभते स्म । तदनु लिङ्गान्मूर्तिमान्परमेश्वरस्सद्यस्समुत्थाय मेघ इव गर्जन्स्वपादेन यमं भुजान्तरे प्राहरत् । तच्चरणेनाभिहतः कृतान्तो दूरे न्यपतत् । शङ्करदर्शनानन्देन परवशो मार्कण्डेयः—

"रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥"

इत्यादिभिः पद्यैस्साञ्जलिबन्धं तमस्तौषीत् । एवं भक्ताग्रगण्येन मार्कण्डेयेन स्तुतो महादेवः प्रसन्नस्तस्मै निरवधिकमायुर्वितीर्यान्तर्दधे । यमोऽपि शङ्करं स्तुत्वा यथाऽऽगतमगच्छत् । मार्कण्डेयः स्वमाश्रमं प्रतिनिवृत्य पितरौ प्रणम्य ताभ्यामभिनन्दितस्तीर्थयात्रादिकं कुर्वन्प्रळयान्बहून्पश्यन्सुखं वसति । अनेन चरितेन मृत्युरपि यत्नतः परिहर्तुं शक्य इति ज्ञायते ॥

———

LESSON III (तृतीयः पाठः)

प्रह्लादः ।

कृतयुगे हिरण्यकशिपुहिरण्याक्षनामानौ दानवौ बभूवतुः । तत्र लोकहिंसकं हिरण्याक्षं भगवान्विष्णुर्वराहो भूत्वा जघान। हिरण्यकशिपुः स्वानुजस्य वधमनुस्मरन्भगवति द्वेषमकरोत् । तदनु स दानवानित्थमाज्ञापयत्–“यत्र यत्र गोब्राह्मणादयस्सन्ति, तं तं जनपदं गत्वा सन्दीपयते” ति । यथानिदेशं ते तान्पीडयामासुः । हिरण्य आत्मनो जरामरणदुःखमपनेतुं कमलासनमुद्दिश्य तपश्चचार । तपोऽग्निना दह्यमानैर्देवैः प्रार्थितो ब्रह्मा हिरण्यस्यान्तिकमुपेत्य “तव तपसा तोषितोऽस्मि । वरं वृणीष्वे” त्यकथयत् । स तु बद्धाञ्जलिर्विधातारं स्तुत्वा वरमेवमवृणीत “त्वत्सृष्टेभ्यो भूतेभ्यो मृत्युर्मे माभूदि” ति । धातरि “तथे” त्यनुगृह्य गतवति, स दैतेयो भगवति द्वेषं वहंस्तद्भक्तान्देवादीन्विजित्य महेन्द्रस्य सिंहासनमाक्रम्य तत्रोपविश्य लोकत्रयमुद्वेजयन्नासीत् । तस्योग्रदण्डाद्भीता देवा नारायणं शरणं गत्वा श्रुतिसुखैः स्तोत्रैः स्तुत्वा नेन “यदा हिरण्यः स्वसुताय महात्मने प्रह्लादाय द्रुह्येत्तदा तं हनिष्यामी” त्युक्ता विगतोद्वेगा यथाऽऽगतमगच्छन् । तस्य दैत्यस्य पुत्राश्चत्वारः प्रादुरभवन् । तेषु प्रह्लादनाम्नस्सूनोर्गर्भवाससमये तज्जनन्यै

नारदो भक्तियोगादिकमुपादिशत् । तत्प्रभावात्प्रह्लादः कल्याणैर्गुणैरलंकृतो भगवति जन्मसिद्धभक्तिमांश्चाभवत् । स बालोऽपि क्रीडनकानि निरस्य सर्वदा भगवन्तमेव ध्यायन्परमानन्दमभजत् । हिरण्यस्तु तं गुरुसकाशं नीत्वा तं स्वसुतं पाठयितुं न्ययुङ्क्त । स तु तेन दण्डनीत्यादिकं पाठ्यमानोऽपि त्रिवर्गपरं तदसाध्वित्यमन्यत । उपाध्यायस्तं तर्जनादिभिर्भीषयित्वा पुनरपि शास्त्रमपाठयत् । यदा प्रह्लादस्य शास्त्रज्ञानं सम्यग्जातं, तदा गुरुस्तं दैत्येन्द्रसकाशमनयत् । असुरेन्द्रः स्वपादयोः प्रणमन्तं बालमाशिषा समभिनन्द्य चिरं परिष्वज्य मूर्धन्याघ्राय प्रसन्नवदनः "आयुष्मन्! इयता कालेन गुरोस्सकाशात्त्वयाधीतेषु शास्त्रेषु यत्सारभूतं, तद्वदे" त्यभणत् ।

प्रह्लाद आह,

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥

इमान्येवाहं सारभूतानि मन्य" इति । असुरस्तद्वचनमाकर्ण्य कोपात्प्रस्फुरिताधरः "गुरो! त्वं मामनादृत्य बालस्यासारमुपादिशः । त्वं गूढविप्रियकारीति संप्रत्येव ज्ञातवानस्मि । अचिरादस्याविनयस्य फलमवाप्स्यसी" त्यब्रवीत् । गुरुराह "राजन्! अस्य नैसर्गिकी विष्णौ भक्तिः । न तु मया परेण वा सा कृता । अतो मयि

मन्युं मा कृथा" इति। अनन्तरमसुरे "कुतस्तवासती मतिर्जाते" ति पृष्टवति, प्रह्लादः कथयति स्म–"विषयासक्तानां महदनुग्रहादृते विष्णौ भक्तिर्न जायते। तदनुग्रहादेव ममैषा भक्तिर्जाते" ति। तदनु दैतेयः "सोदरद्रोहिभक्तोऽयमप्यस्मद्द्रोही" ति निश्चित्य स्वोत्संगात्सुतं निरस्य तं विषदानादिभिरुपायैर्हन्तुं क्रूरान्किंकरान्समादिशत्। यथानिदेशं तैः कृतास्सर्वेऽप्युपाया भगवद्भक्ते तस्मिन्विफलास्संवृत्ताः। यदा गुरुरन्यत्र गतस्तदा प्रह्लादस्सर्वेषामप्यसुरबालानां स्वगुरोर्वचसि असारताबुद्धिं भगवति दृढां भक्तिं चोत्पादयामास। अथ सर्वेषामपि बालानां भगवद्भक्तिं स्वोपदेशे वैमुख्यं चावगत्य गुरुर्भीतो राज्ञे यथावृत्तमकथयत्। दैत्यस्तूपाध्यायात्तनयस्याविनयमाकर्ण्य रोषाविष्टो बद्धाञ्जलिं तं "लोकत्रयभयानकस्य मम शासनं केन बलेन लङ्घितुं प्रवृत्तोऽसी" त्यतर्जयत्। एवं संतर्ज्य "त्वयोक्तो मदन्यो जगदीश्वरो यदि सर्वत्रास्ति, कस्मादस्मिन् स्तम्भे न दृश्यत" इति कथयन्नेव सन्निहितं स्तम्भं मुष्टिना दृढं प्राहरत्। सपदि स्तम्भे तस्मिन्नण्डकटाहभेदी शब्दस्समजायत। तदनु

"सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिं च भूतेष्वखिलेषु चात्मनः।

अदृश्यतात्यद्भुतरूपमुद्वहन्
स्तम्भे सभायां न मृगं न मानुषम् ॥"

दैत्येन्द्रस्तमवेक्ष्य "किमेतन्नरसिंहरूपमि" ति विस्मितो बभूव। अथातिभयङ्करं नखायुधं नरसिंहमभिपत्य स्वगदया वेगेन समताडयत्। नृसिंहस्तु स्वग्रहणे प्रवर्तमानं दैत्यं गरुडः पन्नगमिव गृहीत्वा सन्ध्यायां द्वारे निजोरौ निपात्य लीलया नखैर्व्यदारयत्। तदनु तदनुचरानसुरांश्च जघान। क्रूरस्यासुरस्य वधेन प्रहृष्टा ब्रह्मादयः "त्वमेव जगत्सृष्टि-स्थितिसंहारकारी सर्वस्मात्पर" इति साञ्जलिबन्धमस्तुवन्। अथ भगवत्कोपं श्रियाऽपि शमयितुमशक्तैर्ब्रह्मादिभिः प्रेषितः प्रह्लादो भगवन्तमुपसृत्य साष्टाङ्गं प्रणम्य स्तवप्रियस्य भगवतो हृदयहारिभिः स्तोत्रैस्तुष्टाव। भगवान्प्रशान्तकोपः प्रसन्नवदनः प्रह्लादं प्रति "अभिमतं वरं वृणीष्वे" त्यकथयत्। भगवत्प्रीतिमेव परमं फलं मन्वानः प्रह्लादः "त्वद्भक्तोऽहमन्यत्फलं न कामये। यदि दातुमिच्छसि, विषयेष्वनभिलाषमेव वरं देही" त्यब्रवीत्। भगवांस्तु प्रह्लादस्य विषयेषु वैमुख्यमवगत्य सन्तुष्टः "चिरं दैत्येश्वरभोगमनुभूय, यज्ञैर्मामाराध्य, दिगन्तव्यापिनीं कीर्तिं संपाद्य मुक्तबन्धो मत्समीपमेष्यसी" त्यनुगृह्यौर्ध्वदेहिकं कर्तुं प्रह्लादं न्ययुङ्क्त। तदनु भगवान् "नैवमसुरेभ्यो वरमितः परं देही" ति विधिमनुशास्य तत्रैवान्तर्दधे ॥

LESSON IV (तुरीयः पाठः)

अम्बरीषः।

पुरा मनोस्सन्ततावम्बरीषो नाम कश्चन सार्वभौमो बभूव। सस्वमहिष्या सह विष्णुमारिराधयिषुरेकवत्सरेणानुष्ठेयं द्वादशीव्रतं कर्तुमारभत। कार्तिकमासे व्रतान्ते त्रिरात्रमुपोषितो यमुनायां स्नात्वा मधुवने हरिमर्चति स्म। ततो विप्रेभ्यो गा दत्वा तान्भोजयित्वा तैरनुज्ञातः पारणायोपचक्रमे। तदानीं समागतं दुर्वाससं स संपूज्य भोजनाय प्रार्थयामास। स "तथे" त्युक्त्वा माध्याह्निकस्नानं कर्तुं यमुनामगच्छत्। मुनौ चिरमनागतवति, द्वादश्यामल्पावशिष्टायामम्बरीषो यथाकालमपारणे व्रतवैगुण्यं स्यादिति शङ्कमानो विप्रैस्संमन्त्र्य तदनुज्ञया सलिलमात्रेण पारणां कृत्वा मुनिं प्रत्यैक्षत। दुर्वासाः कालिन्दीतीराद्राज्ञस्समीपमेत्य ज्ञानदृष्ट्या तस्य जलपारणां ज्ञात्वा कुपितस्तं हन्तुं स्वजटामुत्कृत्य तया भयङ्करीं कृत्यामसृजत्। असिहस्तां वधायोद्युक्तां तामुद्वीक्ष्य स्वस्थानान्नृपो नाचलत्। विष्णुना स्वभक्तस्य नृपस्य रक्षणाय पूर्वमेव प्रहितं चक्रं तां कृत्यां दग्ध्वा दुर्वाससं वेगेनाभ्यद्रवत्। स मुनिर्ब्रह्मरुद्रादिसकाशं गत्वाऽपि "न वयं त्वां त्रातुं शक्ता" इति तैरुदितो विष्णोस्समीपं गत्वा नमस्कृत्यात्मानं रक्षितुं प्रार्थयते स्म। हरिस्तु "भक्त-

पराधीनोऽहम् । तस्मान्नृपतेस्समीपमवाप्य तमपराधं क्षन्तुमभ्यर्थये" त्यवदत् । सोऽप्यम्बरीषमुपसृत्य तत्पादयोर्न्यपतत् । अथ राज्ञा भृशं स्तुतं चक्रं मुनिं विहायागमत् । पश्चाद्राजा मुनिं भोजयित्वा स्वयमप्यभुङ्क्त । अथाम्बरीषस्तनयान्राज्ये प्रतिष्ठाप्य वनं प्रविश्य भगवन्तं ध्यायन्परित्यज्य शरीरं परमं पदमवाप । अनेन भगवद्भक्तापचारो दूरीकर्तव्यः, भगवताऽपि समाधातुमशक्यश्चेति ज्ञायते ॥

LESSON V (पञ्चमः पाठः)

शिबिः ।

उशीनरदेशे शिबिर्नाम कश्चिच्चक्रवर्ती बभूव । स कदाचिद्यागमकरोत् । तस्य धर्मपरतां परीक्षितुमिन्द्राग्नी श्येनकपोतौ भूत्वा तत्समीपमवापतुः । तयोः कपोतः श्येनजाद्भयाद्राज्ञ ऊरुं समासाद्य न्यलीयत । तदा श्येनः "सर्वैर्धार्मिक इति प्रशस्यमानस्त्वं क्षुधा पीड्यमानस्य ममाहारभूतं कपोतं धर्मासक्त्या यदि रक्षेः, धर्ममुत्सृष्टवान्भवेरि" त्यवदत् । तदनु राजा श्येनं प्रति "प्राणरक्षणाय मां शरणं गतं कपोतं यदि परित्यजेयं, गोब्राह्मणहत्यां कृतवान् स्याम् । तस्मान्नाहं कपोतं दास्यामी" त्यकथयत् । ततः श्येनो राजानं

प्रत्येवमब्रवीत्–"क्षुधितस्य ममाहारभूतं कपोतं यदि न मुञ्चेः, तदाऽहं म्रियेय, मयि मृते मत्पुत्रकळत्राद्यपि नश्येत्। यो धर्मोऽनर्थपर्यवसायी स कदापि धर्मो न भवेत्। अतस्संप्रति कपोतरक्षणं वरं, उत तद्विसर्जनमिति सम्यग्विचारये" ति। ततो राजा श्येनं प्रत्येवमभाषत "हृदयहारिण्या तव वाण्या 'नास्ति किञ्चिदपि तवाविदितमि' ति मन्ये। गवादिमांसेनापि त्वया क्षुत्प्रतिहन्तुं शक्या। सत्येवं कथं त्वं शरणागतपरित्यागं साधुं मन्यस" इति। श्येनोऽभणत् "दैवेन दत्तं श्येनानां प्रियं कपोतं विहायान्यद्भोक्तुं नेच्छामि, यदि स्नेहात्तं दातुं नेच्छसि, तव मांसमुत्कृत्य तुलायां कपोतेन समपरिमाणं धृत्वा देहि। एवं चेन्मे तुष्टिर्भवेदि" ति। राजा त्विममनुग्रहं मत्वा स्वमांसं सर्वमप्युत्कृत्य कस्याञ्चित्तुलायां स्थापयामास। कपोतस्तुलामन्यामारुरोह। तदानीं नृपतिः कपोतोपेतायास्तुलाया गौरवमालोक्य स्वमांसेन साकं स्वयमपि तुलायामुपाविशत्। तदा श्येनः "अहमिन्द्रः, कपोतोऽग्निः। आवां तव धार्मिकतां परीक्षितुमागतौ। श्लाघनीयेनानेन कर्मणा तव कीर्तिर्लोकान्सर्वानपि प्राप्स्यति। त्वमपि शाश्वतांल्लोकान्गमिष्यसी" त्यनुगृह्य सहाग्निना दिवं ययौ। शिबिरपि यशसा रोदसी संछाद्य देदीप्यमानदेहो दिव्यं विमानमारुह्य स्वर्गं जगाम। अनया कथया शरणागतरक्षणं परमो धर्मः, श्रेयस्करश्चेत्यवगम्यते॥

LESSON VI (षष्ठः पाठः)

सुमतिः ।

पुरा वसुमतीनगरे सुन्दरो नाम भूपतिरासीत् । तस्य सरस्वती नाम सहधर्मिणी बभूव । अनपत्यतया दूयमानयोरनयोर्दैवाच्चरमे वयसि पुत्रो जज्ञे । सन्तुष्टस्सुन्दरः स्वसुतस्य सुमतिरिति नाम चकार । जातस्य तस्य पञ्चपमासेषु गतेषु, तौ दम्पती दौर्भाग्याद्युगपदेव दुष्परिहरेण रोगेणाभिभूतौ मृतिमवापतुः । नियन्तुरभावात्सचिवादिषु प्रत्येकं प्रभुत्वकामनया मिथः स्पर्धमानेषु रन्ध्रान्वेषिणो रिपवो महता सैन्येन वसुमतीमुपरुध्य राज्यमशेषमप्यात्माधीनं चक्रुः । अथ धात्री काचिज्जिघांसया रिपुभिरन्विष्यमाणं राजपुत्रं निगूढमादायारण्यमध्यमधिगत्य रविकिरणैरभितप्ता रमणीयं सरो विलोक्य तत्तीरे स्वीयमुत्तरीयमास्तीर्य तस्मिंस्तं शाययित्वा जले स्नातुमवातरत् । अवतीर्णमात्रा च सा महता ग्राहेण दृढं गृहीता सद्यः प्राणान्विजहौ । अथ सुप्तोत्थितः सुमती रोदितुमारभत । तत्रारण्ये वर्तमानानां शबराणामधिपो विष्णुमित्रोऽनपत्यतया शिशुरोदनाकर्णनक्षण एव तत्समीपं प्रति प्रधाव्य तं सहर्षमादाय भार्यायै समर्प्य "तनयोऽयमावाभ्यां दैवेन दत्तः, परिपोष्यतामि" ति तामादिदेश । तया स्वात्म-

जनिर्विशेषं स संवर्धितस्समुचिते वयसि शबरसकाशे धनुर्विद्यामभ्यस्य तत्र परमं प्रावीण्यमुपगतवान् । कदाचित्सुमतिर्वयस्यैर्व्याधैस्सह मृगयोपकरणान्यादाय विन्ध्यवनमध्यं प्रविश्य क्रूरान्प्राणिनो व्यापाद्यातीव श्रान्तोऽभवत् । तदनु प्रच्छाय शीतलस्य सरस्तीरे विलसतस्तरोस्तलमधिगत्य किङ्करैरास्तीर्णे शयने शयित्वा तदाहृतानि फलान्यास्वाद्य सुखमतिष्ठत् । तदा मूर्तइव सुकृतराशिः कश्चित्तापसस्तत्सविधमधिगत्य तेन सप्रणामं भूमावास्तीर्णे पीठे समुपविश्य तं सम्यगवलोक्य समाधिना विदिततदीयोदन्तो भृशं जहास । सुमतिस्तु सप्रश्रयं तापसमेवमपृच्छत् “ किमर्थं जनमिममालोक्य हासः कृतः ? प्रसीदत्वार्य इदमावेदयितुमि ” ति । तापसस्तु तस्मै तस्य सत्यां जातिं, पित्रोर्धात्र्याश्च विपत्तिं, राज्यस्य शत्रुभिराक्रमणं, शबराधिपेन परिपोषणं च निवेद्येत्थमकथयत् “ तव दशामीदृशीं विचिन्त्य कथमेवंविधकष्टभूयिष्ठेपि संसारे प्राणिनः प्रीतिमादधत इति व्यचिन्तयम् । एवं विचिन्तयत एव मे हासः प्रादुरभूदि ” ति । एवमभिहितस्सुमतिर्विषण्णस्तापसचरणौ शरणं जगाम । सोऽपि सुमतेः पितृपदप्राप्त्युपायमुपदिदेश । सुमतिस्तु व्याधसंबन्धं विधूय स्वपुरमागत्य तेनोपायेन पितृपदमवाप्य वशीकृतराजलोकः पृथिवीं चिरं पर्यपालयत् । अनया कथया पुरुषस्य सदुपदेशादात्मस्वरूपावगतिः परमानन्ददायिनीत्यवगम्यते ॥

LESSON VII (सप्तमः पाठः)

प्राणेन्द्रियविवादः ।

पुरा प्राणेन सममिन्द्रियाणि श्रैष्ठ्यविषये कलहं कलयन्ति स्म । चिरं तेन विवदमानान्यपि स्वेष्वन्यतमस्य श्रैष्ठ्यं निर्धारयितुं यदा नापारयन्, तदा सह तेन चतुर्मुखसकाशमासाद्य "को नः श्रेष्ठ" इति तमपृच्छन् । चतुर्मुख एवमुत्तरं ददौ "युष्माकं मध्ये यस्मिन्शरीरादुत्क्रान्ते सति शरीरं हेयदशामासादयति स वः श्रेष्ठ" इति । तानि तद्वाक्यमाकर्ण्य निवृत्य सह प्राणेन शरीरं प्रविष्टपूर्वं पुनः प्राविशन् । तत इन्द्रियेष्वेकैकमपि स्वस्य श्रैष्ठ्यनिर्णयाय शरीरादुत्क्रम्य वत्सरमेकैकमन्यत्रोषित्वा पुनः शरीरसकाशमाजगाम । पर्यपृच्छच्चैकैकमपि शरीरस्थितान्यन्यानीन्द्रियाणि "मय्युत्क्रान्ते शरीरस्थितिः कथमासीदि" ति । तान्येवमुत्तरं ददुः "त्वय्युत्क्रान्तेऽपीतरेन्द्रियव्यापारसद्भावाच्छरीरस्थितेर्नकापिहानिरि" ति । तदनु न स्वस्य श्रैष्ठ्यमिति निश्चित्येन्द्रियमेकैकमपि शरीरं प्राविशत् । ततः प्राणो यथा शोभनोऽश्वः परीक्षार्थं स्वोपरि समारूढेन संताडितः पादबन्धनकीलकानुत्पाट्य धावति, तथा स्वस्थानेभ्य इन्द्रियाण्युत्पाटयन्नेव निर्गन्तुं प्रावर्तत । तान्यनुपदं समेत्य प्राणं प्रत्येवमकथयन् "त्वमेव नः श्रेष्ठोऽसि । अविवेकात्त्वाम-

वाजानीम । तस्मान्मोत्क्रमीः । प्रसीद यथापूर्वमस्मान्व्यापारयितुमि" ति । अतिपरिचयेन प्राणावमाननात्किलेन्द्रियाणि महत्कष्टमवापुः । तस्मादतिपरिचयादवज्ञा न क्वापि कर्तव्या ॥

LESSON VIII (अष्टमः पाठः)

सीताकल्याणम् ।

मिथिलाधिपतिर्वीरो जनको नाम धर्मवित् ।
क्षत्रधर्मे ह्यभिरतो न्यायतश्शास्ति मेदिनीम् ॥ १ ॥
तस्य लाङ्गलहस्तस्य कर्षतः क्षेत्रमण्डलम् ।
अहं किलोत्थिता भित्वा जगतीं नृपतेस्सुता ॥ २ ॥
स मां दृष्ट्वा नरपतिर्मुष्टिविक्षेपतत्परः ।
पांसुकुण्ठितसर्वाङ्गीं जनको विस्मितोऽभवत् ॥ ३ ॥
अनपत्येन च स्नेहादङ्कमारोप्य च स्वयम् ।
ममेयं तनयेत्युक्त्वा स्नेहो मयि निपातितः ॥४ ॥
अन्तरिक्षे च वागुक्ताऽप्रतिमाऽमानुषी किल ।
एवमेतन्नरपते धर्मेण तनया तव ॥ ५ ॥
ततः प्रहृष्टो धर्मात्मा पिता मे मिथिलाधिपः ।
अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः ॥ ६ ॥

दत्ता चास्म्यभीष्टवद्देव्यै ज्येष्ठायै पुण्यकर्मणा ।
तया संभाविता चास्मि स्निग्धया मातृसौहृदात् ॥ ७ ॥
पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता ।
चिन्तामभ्यगमद्दीनो वित्तनाशादिवाधनः ॥ ८ ॥
सदृशाच्चापकृष्टाच्च लोके कन्यापिता जनात् ।
प्रधर्षणामवाप्नोति शक्रेणापि समो भुवि ॥ ९ ॥
तां धर्षणामदूरस्थां दृष्ट्वा चात्मनि पार्थिवः ।
चिन्तार्णवगतः पारं नाससादाप्लवो यथा ॥ १० ॥
अयोनिजां हि मां ज्ञात्वा नाध्यगच्छद्विचिन्तयन् ।
सदृशं चानुरूपं च महीपालः पतिं मम ॥ ११ ॥
तस्य बुद्धिरियं जाता चिन्तयानस्य सन्ततम् ।
स्वयंवरं तनूजायाः करिष्यामीति धीमतः ॥ १२ ॥
महायज्ञे तदा तस्य वरुणेन महात्मना ।
दत्तं धनुर्वरं प्रीत्या तूणी चाक्षयसायकौ ॥ १३ ॥
असञ्चाल्यं मनुष्यैश्च यत्नेनापि च गौरवात् ।
तन्न शक्ता नमयितुं स्वप्नेष्वपि नराधिपाः ॥ १४ ॥
तद्धनुः प्राप्य मे पित्रा व्याहृतं सत्यवादिना ।
समवाये नरेन्द्राणां पूर्वमामन्त्र्य पार्थिवान् ॥ १५ ॥
इदं च धनुरुद्यम्य सज्यं यः कुरुते नरः ।
तस्य मे दुहिता भार्या भविष्यति न संशयः ॥ १६ ॥
तच्च दृष्ट्वा धनुःश्रेष्ठं गौरवाद्गिरिसन्निभम् ।

अभिवाद्य नृपा जग्मुरशक्तास्तस्य तोलने ॥ १७ ॥
सुदीर्घस्य तु कालस्य राघवोऽयं महाद्युतिः ।
विश्वामित्रेण सहितो यज्ञं द्रष्टुं समागतः ॥ १८ ॥
लक्ष्मणेन सह भ्रात्रा रामस्सत्यपराक्रमः ।
विश्वामित्रस्तु धर्मात्मा मम पित्रा सुपूजितः ॥ १९ ॥
प्रोवाच पितरं तत्र भ्रातरौ रामलक्ष्मणौ ।
सुतौ दशरथस्येमौ धनुर्दर्शनकाङ्क्षिणौ ॥ २० ॥
धनुर्दर्शय रामाय राजपुत्राय दैविकम् ।
इत्युक्तस्तेन विप्रेण तद्धनुस्समुपानयत् ॥ २१ ॥
निमेषान्तरमात्रेण तदानम्य स वीर्यवान् ।
ज्यां समारोप्य झटिति पूरयामास वीर्यवत् ॥ २२ ॥
तेन पूरयता वेगान्मध्ये भग्नं द्विधा धनुः ।
तस्य शब्दोऽभवद्भीमः पतितस्याशनेरिव ॥ २३ ॥
ततोऽहं तत्र रामाय पित्रा सत्याभिसन्धिना ।
निश्चिता दातुमुद्यम्य जलभाजनमुत्तमम् ॥ २४ ॥
दीयमानां न तु तदा प्रतिजग्राह राघवः ।
अविज्ञाय पितुश्छन्दमयोध्याधिपतेः प्रभोः ॥ २५ ॥
ततश्श्वशुरमामन्त्र्य वृद्धं दशरथं नृपम् ।
मम पित्रा त्वहं दत्ता रामाय विदितात्मने ॥ २६ ॥
ममैव चानुजा साध्वी ऊर्मिळा प्रियदर्शना ।
भार्यार्थे लक्ष्मणस्यापि दत्ता पित्रा मम स्वयम् ॥ २७ ॥

एवं दत्तास्मि रामाय तदा तस्मिन्स्वयंवरे।
अनुरक्तास्मि धर्मेण पतिं वीर्यवतां वरम् ॥ २८ ॥
(श्रीमद्रामायणे अयोध्याकाण्डे अनसूयां प्रति सीतया स्व
विवाहकथनम्)

LESSON IX (नवमः पाठः)

भरद्वाजः ।

पुरा कदाचिद्भरद्वाजाख्यो महर्षिस्सर्वेषां वेदानामध्ययने कृतप्रयत्न इन्द्रं प्रसाद्य तत्प्रसादाच्छतसंवत्सरपरिमितानि त्रीण्यायूंषि लेभे । लब्धैश्च तैरायुर्भिस्स वेदाध्ययनाय गुरुकुले वासं चक्रे । शतत्रयस्यान्ते जीर्णशरीरमशक्त्या शयानं भरद्वाजं प्रतीन्द्र आगत्येत्थं पप्रच्छ "यदि चतुर्थमायुस्ते दद्यां, एतेन कं पुरुषार्थं साधयिष्यसी" ति । स च "वेदाध्ययनमेव करिष्यामी" त्युवाच । ततो बहुशाखानां वेदानामध्ययने कृतोद्योगं भरद्वाजमधिकृत्य, शक्रस्सर्वाध्ययनमशक्यमिति बोधयितुं ऋग्यजुस्सामवेदानां त्रयाणां स्वकीययोगसामर्थ्येन पर्वताकारतां संपाद्य, तानस्मै दर्शयामास । तदनु तेषु पर्वतेष्वेकैकस्मात्पर्वतान्मुष्टिना पांसूनाददे । आदायैवमुवाच " हे भरद्वाज! एते त्रयः पर्वता वेदा एव ।

तत्र मुष्टिपरिमित एकैकः पांसुसमूह एका शाखा। त्वमेतैस्त्रिभिरायुर्भिर्मुष्टित्रयपरिमितमेतच्छाखात्रयं गुरोरधीतवानसि। इतराश्शाखास्तु त्वया नाधीता एव। तस्मात्सर्वशाखाध्ययनमशक्यमित्यवगच्छ। विरम प्रयत्नादस्मादि" ति। तदनु भरद्वाजस्सर्वशाखाध्ययनोद्योगान्न्यवर्तत। अनेन 'वेद एकैकोऽप्यनन्तशाख' इति ज्ञायते॥

LESSON X (दशमः पाठः)

॥ कीटः ॥

पुरा कश्चित्कीटश्शकटमार्गे धावन्नासीत्। सर्वभूतभाषाभिज्ञो भगवान्व्यासस्तं समीक्ष्य "कुतस्त्वं धावसी" ति पर्यपृच्छत्। कीट उवाच "गुरुशकटानां, तत्र नियुक्तानां भारवाहिनां श्वसतां वृषभाणां तान्प्रेरयतां पुरुषाणां च भयङ्करान् शब्दानाकर्ण्य भृशं बिभेमि। दुःखदायी खलु मृत्युस्सर्वेषां भूतानाम्। अतः पलायेऽहमापदमिमां तरितुमि" ति। व्यासो व्याहरति स्म "तिर्यग्योनौ जातस्त्वं सुखमीषदपि नानुभवसि। दुःखमेवानुभवसि। अतो मन्ये मरणमेव ते श्रेय" इति। कीट आह "भगवन्! नैवं भवान्मन्यताम्। अहं तिर्यग्देहानुगुणं सुखमनुभवाम्येव।

अतो जीवितुमिच्छामि। अहं किल पूर्वस्मिन् जन्मनि धनिकः कश्चन मनुष्य आसम्। तदात्वे चाहमतिगर्हितानि कर्माण्याचरन्नासम्। एवं वर्तमानोऽप्यहं वृद्धां जननीं जातिगुणोपेतं कञ्चनातिथिञ्चापूजयम्। तत एव पूर्वस्मृतिर्मां न जहाति। शुभकर्मणां फलमित उत्तरं स्यादिति तर्कये। तच्छ्रेयस्तपोधनस्य भवतस्सकाशाच्छ्रोतुमिच्छामी" ति। व्यासो वदति स्म "अहं त्वां दर्शनादेव तपोबलात्तारयामि। तत एव तिर्यङ्रूपित्वं न मुह्यसि। जानामि त्वां कर्मणा कीटरूपमापन्नम्। यदि मनुष्यो भवितुमिच्छसि, जन्मानि बहूनि लब्ध्वा, यस्मिन् जन्मनि प्राणिनो बहवो विधेया भवेयुः, तज्जन्म लप्स्यसे। तदानीं देवतापूजकस्सदाचारपरश्च भविष्यसि। यदि ब्राह्मणो भवितुमिच्छसि, तथैव क्रमेण भविष्यसी" ति। कीटस्तथेत्युक्त्वा बहूनि जन्मानि लब्ध्वा राजपुत्रतामन्ते प्राप्य व्यासवचनमनुस्मृत्य तत्समीपमुपसृत्य कृताञ्जलिरेवमवदत् "भगवन्! प्रशस्तमिदं शरीरम्। भवत्प्रसादादद्यातिबला हेममालिनः कुञ्जरा मां वहन्ति। सबान्धवोऽहं राजभोगान्भुञ्जानोऽस्मि। रात्रौ सुखशयनेषु कृतस्वापं मामुषसि वन्दिनो देवा महेन्द्रमिव स्तुवन्ती" ति। व्यासो भणति स्म "प्राक्तनेन सुकृतेनैव तव मद्दर्शनं जातम्। मदर्चनाद्रणाङ्गणे गोब्राह्मणकृते प्राणान्हित्वा विप्रत्वमवाप्स्यसी"ति। राजपुत्रोऽयं बहून्यागान्कृत्वा

वने तपश्चचार । व्यास आगत्य "किमर्थं स्वधर्मं विहाय तपश्चरसि ? प्रजा धर्मेण परिपालय । ततः क्षात्रीं तनुमुत्सृज्य ब्राह्मण्यमेष्यसी" ति कथयति स्म । सोऽपि वनान्निवृत्य यथोक्तमकरोत् । जन्मान्तरे स विप्रोऽभवत् । व्यासस्तत्सकाशमागत्य "ब्राह्मणोत्तम ! शुभकृच्छुभकुले, पापी पापकुले च जायत इत्येतत्तत्र कीटादीनि विप्रान्तानि शरीराणि लब्धवतो विदितमेव । तस्मादुत्तमं धर्ममाचर । पूर्ववन्मृत्युतो मा भैषीरि" त्यवदत् । विप्र आह "भगवन् ! भवतः प्रसादात्सज्जन्म मया प्राप्तम् । इतः परं यथानिदेशं मृत्युभयं विहाय धर्ममाचरिष्यामी" ति । तदनु कर्माण्यनवरतमनुष्ठायान्ते ब्रह्मलोकमलभत । अनया कथया महत्यपि कष्टे प्राणिनां जीविते नैराश्यं न भवतीति, महतां प्रसादादलभ्यं किञ्चिदपि नास्तीति चावगम्यते ॥

LESSON XI (एकादशः पाठः)

सौभरिः ।

पुरा ऋग्वेदपारगस्सौभरिर्नाम मुनिर्जलस्यान्तर्द्वादशवत्सरांस्तपश्चचार । तत्र बह्वपत्यो महान्कश्चन मीनः स्वाङ्गेषूपविश्य विहरतः पुत्रपौत्रादीनालोक्य हर्षपरवशस्तत्स्पर्श-

सुखमनुभवन्परमानन्दमभजत । स मुनिस्तथा रममाणं महामीनमालोक्य स्वयमपि गार्हस्थ्यसुखमनुभवितुकामः कन्यार्थं मान्धातृनामानं राजानमगच्छत् । स राजा विधिवत्तमभ्यर्च्य "किमभिमतं भगवतः?" इत्यपृच्छत् । मुनिर्नृपं प्रत्येवमवदत् "राजन्! अहं विवाहे कृतमतिरस्मि । तव पञ्चाशत्कन्यास्सन्ति। तास्वेकां मे देही" ति । राजा जराजर्जरितस्य तस्य वचनमाकर्ण्य शापभीतो मुखान्तरेण निराकर्तुकाम एवमवदत् "भगवन्! यदि मम कन्यासु या काचित्त्वां कामयते, तां तुभ्यं दास्यामी "ति । सौभरिस्तदभ्युपगम्य राजभृत्येन दर्शितमार्गस्तपःप्रभावात्कमनीयं रूपं परिगृह्य कन्यान्तःपुरं प्राविशत् । कन्यकाः सर्वा अपि तद्दर्शनमात्रेण सानुरागा "मयाऽयं प्रथमं वृतः, एष विधिना ममैव पतिस्सृष्ट", इत्यादि मिथो वदन्त्यः अहमहमिकया तं वृणते स्म । राजा तु भृत्यमुखेन विदितवृत्तान्तो व्याकुलमतिरनिच्छन्नपि तं कन्यानां पाणिमग्राहयत् । मुनिस्तास्सर्वा अप्याश्रमं नीत्वा विश्वकर्माणमाहूय हृदयङ्गमान् जलाशयप्रासादोपवनशयनासनपरिच्छदांस्तत्र निर्मातुमादिदेश । स तथैवाकरोत् । सौभरेः प्रभावात्प्रतिगृहं नन्दो नाम निधिरासीत् । राजपुत्र्यो निधिप्रभावाद्यथेष्टमागतान्भक्ष्यादीनन्यान्भोजयन्त्यः स्वयञ्च भुञ्जानाः प्रियेण सह सुखमनुभवन्ति स्म । कदाचिद्दुहितृवत्सलो राजा मुनेराश्रममासाद्य तत्र

स्फटिकमयीं प्रासादपङ्क्तिं रमणीयानि जलाशयोपवनानि चावेक्ष्य विस्मितः प्रासादमेकं प्राविशत् । तत्र कयाचिदात्मजया सादरमुपचरितो राजा स्नेहात्तां परिष्वज्य "वत्से!, अप्यत्र सुखं? अपि महर्षिस्त्वयि स्निह्यति? अपि जन्मभूमिं स्मरसी" त्यपृच्छत् । तनया तु पितरमेवमवदत् "तात! प्रासादोपवनादिकं सर्वमपि मनोहरम् । हृद्यैराहारैर्वसनानुलेपनाभरणैस्सुकुमारैश्शयनैश्चाहमानन्दसागरे निमग्नाऽस्मि । अथापि जन्मभूमिः कथं विस्मर्येत? एवं वर्तमानाया अप्यस्त्येव मे दुःखं, यन्मम प्रियः प्रीत्या मत्समीप एव सदा वर्तमानो भगिनीनां मुखमपि नेक्षत" इति । राजा तु तदाकर्ण्य द्वितीयं प्रासादं गत्वा तत्राप्यन्यया पुत्र्या पूजितः प्रहृष्टस्तां तथैवापृच्छत् । सापि तथैवोत्तरं ददौ । क्रमेण राजा प्रासादान्सर्वानपि गत्वा तथैव पृष्टाभिस्तनयाभिस्तथैवोत्तरितो विस्मितस्सौभरिमेकान्ते समवस्थितमुपेत्य संपूज्य "नैवेदृशमन्यस्य सिद्धिप्रभावं दृष्टवानस्मी" ति तमभिनन्द्य तेन सह कञ्चित्कालमभिमतभोगमुपभुज्य स्वपुरं जगाम । अथ केषुचिद्वत्सरेषु गतेषु, मुनेर्भूपात्मजासु बहवः पुत्रा उदभवन् । मुनिः पुत्रेष्वनुदिनमेधमानेन स्नेहेन विस्मृतनिजस्वरूपः "अपीमे पुत्राः कलभाषिणः पद्भ्यां गच्छेयुः? अपीमे युवानो भूत्वा सदारा भवेयुः? अप्येषां पुत्रांस्तत्पुत्रांश्च पुत्रिणः पश्येयमि" त्याशंसते

स्म। एवमात्मनो मनोरथमनुदिनमेधमानमवेक्ष्य स मुनिः "अहो मे मोहस्य विस्तार" इति विचिन्त्य भृशमखिद्यत। आह चैवं "उपर्युपर्युत्पद्यमानानां मनोरथानां समाप्तिर्नास्ति। मनोरथाशंसिनो मनः कदापि परमात्मसंगि न भवती" ति। एवमभिधाय पुत्रादिकं संत्यज्य सभार्यो वनं प्रविश्य तीव्रं तपस्तप्त्वा निर्धूतनिखिलकल्मषः परित्यज्य शरीरं परमं पदमविन्दत। अनेन चरित्रेण विषयासक्तसंगोऽनर्थावहस्तद्विरहः क्षेमप्रद इति फलति॥

LESSON XII (द्वादशः पाठः)

धर्मव्याधः।

पुरा कस्मिंश्चिन्नगरे वेदवेदाङ्गपारगः कश्चन विप्र आसीत्। तस्य धनुर्वेदे प्रवीणः कश्चिद्राजा सुहृदासीत्। तत्सङ्गाद्विप्रो धनुर्विद्यायां निष्णातोऽभवत्। कदाचिद्राजा ससैन्यो मृगयां कर्तुं वनमगमत्। विप्रोऽपि तेन सह वनं प्रविश्य मृगबुद्ध्या कञ्चिदृषिं घोरेण शरेण सन्ताडयति स्म। भूमौ निपतितः स ऋषिः "अनपराधिनं मां कः समताडयदि" ति सक्रोधमवदत्। विप्रस्तु तं मृगं मन्वानः समीपं प्राप्य ऋषिरित्यवगत्य व्यथितमना इत्थमाह "ब्रह्मन्!

अज्ञानेन कृतोऽयमपराधः क्षन्तव्य" इति। ऋषिस्तु क्रोधाविष्ट एवमशपत् "क्रूर! त्वं व्याधो भविष्यसी" ति। स तु "भगवन्! अज्ञानान्मया कृतं क्षन्तुमर्हसी" ति पुनः-पुनः प्रार्थयामास। महर्षिस्तु "नान्यथा मे शापो भविष्यति। परन्तु व्याधोऽपि मदनुग्रहाद्धर्मज्ञः पित्रोः शुश्रूषुश्च भूत्वा मृत्वा ब्रह्मवित्कुले जन्म लब्ध्वा वैकुण्ठं गमिष्यसी" त्यकथयत्। विप्रस्तु तदुपरि लग्नं शरमुद्धृत्य जीवन्तमेव तमाश्रमं नीत्वा विवर्णवदनो राज्ञः समीपमगच्छत्। राजा तु तद्दुःख हेतुमवगत्य "तदनर्थस्याहमेव हेतुरि" त्यात्मानं विनिन्दन्नेव मृगयां विहाय स्वनगरमगमत्। विप्रस्तु महता शोकेनाविष्टः क्रमेण मृतिमवाप्य मिथिलायां कस्यचिद्व्याधस्य पुत्रः समभवत्। पिता तु तस्य धर्मव्याध इति नाम चकार। अथ बाल्ये निवृत्ते स धर्मज्ञः पापाद्भिया मृगान्स्वयमहत्वा परैर्हतानां मृगाणां मांसान्यल्पमूल्येन क्रीत्वा कस्मिंश्चिदापणे तानि निक्षिप्य विक्रीयाधिकं धनमर्जयन्नासीत्। स्वपितरौ दैवतं मत्वा सपुत्रदारः नानाविधैरुपचारैः समतोषयत्। एवं स्थिते कस्मिंश्चिद्ग्रामे कौशिकनामाऽधीतवेदःकश्चिद्ब्राह्मणो वृद्धौ स्वपितरौ परित्यज्य ग्रामाद्बहिर्वर्तमानस्य कस्यचित्तरोर्मूलमासाद्य वेदमपठत्। वृक्षोपरि स्थिता काचिद्बलाका ब्राह्मणोपरि पुरीषमुदसृजत्। ततः क्रुद्धो द्विजो बलाकामुद्वीक्ष्य तन्नाशमाशंसते स्म। सद्यो गतजीवितां भुवि

पतितां तामवेक्ष्य स द्विजः "कोपादकार्यं कृतवानस्मी" ति सुतरामन्वतप्यत। तदनु भिक्षार्थं किञ्चिद्गृहं गत्वा "भिक्षां देही" ति काञ्चन स्त्रियमयाचत। एतस्मिन्नन्तरे तस्याः पतिः क्षुधा पीडितो गृहमागमत्। पतिव्रता सा "विप्र! तिष्ठ" त्युक्त्वा भर्तारं पाद्यादिदानेन पर्यचरत्। तदनु भिक्षामादाय ब्राह्मणसमीपमगच्छत्। स तु ब्राह्मणः "कुतो मामवमन्यसे? ब्राह्मणानां प्रभावं किं न जानासी" ति सक्रोधमवादीत्। सा तु विप्रं प्रत्यवदत् "नाहं बलाका। पतिव्रता खल्वहम्। क्रुद्धस्त्वं किं मां करिष्यसि? स्त्रीणां पतिरेव दैवतमिति मत्वा क्षुधातुरं पतिं परिचर्यागतवत्यस्मि। पत्युः परिचरणप्रभावाद्धि परोक्षमपि बलाकादाहवृत्तान्तमवगन्तुं शक्नोमि। भवांस्तु धर्मरहस्यं न जानाति। अतस्तदवगमाय मिथिलां गत्वा धर्मव्याधं पृच्छत्वि" ति। अथ द्विजन्मा तस्याः परोक्षज्ञानेनात्मनो धर्माधर्माविवेकेन च जाताभ्यां विस्मयविषादाभ्यामाक्रान्तचेता धर्मपरिज्ञानाय जनकेन संरक्षितां मिथिलामवाप्य धर्मव्याधस्यापणसमीपमुपेत्य क्रेतृजनैराकीर्णतया मांसदुर्गन्धबाहुल्येन च दूरत एव तदभिमुखमतिष्ठत्। धर्मव्याधस्तु द्विजं प्राप्तमवगत्य संभ्रमेणोत्थाय तत्परिसरमुपेत्य तमभिवाद्य "पतिव्रतावचनमनुसृत्य धर्मप्रश्नायागतो भवानिति जानामि। यच्चिकीर्षितं तद्वदतु भवानि" त्यभगत्। विप्रस्तद्वाक्यमाकर्ण्य "द्वितीय-

मिदमाश्चर्यमि" त्यमन्यत। व्याधस्तु "नेदं तव योग्यं स्थानम्। अत आवां गृहं गच्छावे" त्युक्त्वा तत्संमतिमवगत्य विप्रं पुरस्कृत्य स्वगृहं गत्वा तस्मै पाद्यादिकं दत्वा तमासने समुपावेशयत्। स तु व्याधं प्रत्यवादीत् "मांसविक्रयो भवतो नानुरूप इति मे प्रतिभाति। घोरेण तव कर्मणा मे खेदो जायत" इति। व्याधो व्याहरत् "विप्र! कुलोचितमेवाहं कर्म करोमि। अतो मयि मन्युं मा कृथाः। वृद्धौ पितरौ प्रयत्नेन शुश्रूषे। सत्यं वदामि। नाभ्यसूयामि। यथाशास्त्रमनुतिष्ठामी" ति। एवमुक्त्वा पित्रोः सकाशं गत्वा ताववन्दत। तौ त्वाशिषं प्रयुज्य "तव शुश्रूषया सुतरां प्रीतौ स्व" इत्यवोचताम्। अथ व्याधो विप्रागमनं तत्सकाशे न्यवेदयत्। तौ तु सादरं विप्रं प्रति कुशलप्रश्नमकुरुताम्। तदनु व्याधो विप्रं निरीक्ष्य "पितरौ मम परमं दैवतम्। यद्दैवतेभ्यः कर्तव्यं तदेताभ्यां करोमि।

एतदर्थं मम प्राणा भार्या पुत्रः सुहृज्जनः।
सपुत्रदारः शुश्रूषां नित्यमेव करोम्यहम्॥

मातापितृशुश्रूषयैव परोक्षज्ञानसामर्थ्यं मे जातम्। पितृपरिचर्या परमो धर्म इति बोधयितुमेव पतिव्रतया मत्समीपं प्रेषितोऽसि। अन्धौ पितरावुपेक्ष्य वेदोच्चारणमेव धर्मं मत्वा बहिर्निर्गतोऽसि। पित्रोः प्रसादादृते त्वत्तपः सर्वमपि

विफलम्। अतः क्षिप्रं तत्सकाशमासाद्य तौ प्रसादय। पित्रोः परिचरणादन्यच्छ्रेयस्करं नाहं पश्यामि। गम्यतां, गम्यतामि" त्यब्रवीत्। द्विजस्त्वतीव सन्तुष्टः "ईदृशो धर्मप्रदर्शको लोके दुर्लभः। नरके पतिष्यन्नहमद्य भवता समुद्धृतोऽस्मि। इतः परं यथोक्तं करिष्य" इत्युक्त्वा तदनुज्ञामवाप्य पित्रोस्सकाशं गत्वा तौ संपूज्य परमानन्दभरितावकरोत्। व्याधः पितृपरिचर्यासंभृतेन तपसा जन्मान्तरे श्रोत्रियो ब्राह्मणो भूत्वा भगवद्भक्त्या परमं पदमवाप। अनेनोपाख्यानेन पित्रोः परिचरणमैहिकामुष्मिकनिखिलफलप्रदमित्यवगम्यते ॥

LESSON XIII (त्रयोदशः पाठः)

काळिदासः।

कविकुलचूडामणेरस्य विषये किंवदन्तीयं सर्वत्रविजृम्भते—पुरा किल कस्मिंश्चन देशे भूपालः कश्चनासीत्। तस्य पुत्री सर्वास्वपि विद्यासु प्रवीणा बभूव। अथ तस्या विवाहोचिते वयसि समागते, नृपतिर्देशान्तरस्थान्राजकुमारान्स्वामात्यपुत्रं चानाय्य "एतेष्वभिमतं कश्चिद्भर्तृतया वृणीष्वे" त्यकथयत्। सा तु विद्यया स्वानुरूपं कमपि तत्रापश्यन्ती

तान्सर्वानपि निराकरोत् । तदनु तस्यास्समुज्जृम्भमाणे यौवने महीपतिश्चिन्ताकुलः पुत्रीमाहूय "वत्से ! परेद्युः प्रभाते यो राजकुमार आगमिष्यति, तस्मै त्वां दास्यामि । तं निराकर्तुं नार्हसी" त्यादिदेश । स्वकुमारनिराकरणेन कुपितो मन्त्री "परेद्युर्येनकेनाप्यानीतेन राजकुमार्या अवलिप्तायाः परिणयं कारयित्वा दर्पश्शातनीय" इति निश्चित्याश्वमारुह्य काननमगच्छत् । तत्र कश्चित्कमनीयाकृतिस्तरोश्शाखाग्रमारुह्य शाखामूलं छिन्दन्नासीत् । अमात्यस्तमवलोक्य तस्य कुलादिकं पृष्ट्वा प्रतिवचनरूपं तदीयं प्रलापमाकर्ण्य "पर्याप्तोऽयं बुद्धिहीनस्तस्या दर्पनिरासाये" ति निश्चित्य प्रणयनिर्भरैर्विस्रम्भावहैर्वाक्यैस्तं संतोष्य तरोरवतार्याश्वोपरि समुपवेश्य स्वभवनमाजगाम । श्वः प्रभाते मन्त्री स्वेनानीतं कुमारमाहूयेत्थमकथयत्, "त्वां राज्ञो जामातरं विधातुमिच्छामि । ततो राजसकाशे भवता प्रमादमन्तरेण व्यवहर्तव्यमि" ति । एवमुक्त्वा तं भूपालोचितवेषं कारयित्वा सह कैश्चिद्भृत्यैर्भूपतेर्द्वारं निनाय । तत्र समर्थः कश्चिन्नृपतौ राजसूनोरागमनमावेदयत् । राजापि, सोत्साहं प्रत्युद्गम्य, अलङ्कारेण राजपुत्रं निश्चित्य, शुभे मुहूर्ते कुमार्या पाणिमग्राहयत् । यदा दंपत्योरनयोरेकान्ते संलाप-प्रसक्तः, तदा राजपुत्री गोपालोचितान्भर्तुः प्रलापानाकर्ण्य कोपाविष्टेत्थमवदत्, "मूढ ! त्वदीयप्रलापैस्त्वं गोपालदारक इति

निरधारयम् । तस्मादस्माद्गृहादपसर । वाग्देव्याः प्रसाद-मसंपाद्य न मे गृहं प्रत्यागन्तुमर्हसी" ति । एवमादिवचनै-रधिक्षिप्तस्स दुःसहं दुःखमापन्नः "वाग्देवीप्रसादमन्तरेण न निवर्तिष्य' इति तत्सविधे प्रतिश्रुत्य, विन्ध्यवनमध्यं जगाम । तीव्रेण तपसा कांश्चिन्मासान्काळीं समाराध्य प्रसन्नायास्तस्या "वाग्विधेया ते भूयादि" त्यनुग्रहमनि-तरसुलभमासाद्य मोदमेदुरो निवृत्य रात्रौ राजपुत्र्यधिष्ठितं गृहमागत्य तामाहूय "कवाटमुद्घाटये" त्यवदत् । सा तु तदानीं "कथमहं कुलस्त्री सती मूढमपि पतिमधिक्षिप्तवती ? कदा पुनः पत्युः समागममासादयेयम् ? धिङ्मामकार्यकारि णीमि" ति विचिन्तयन्ती बाष्पं विकिरन्ती दुःखसागरे निमग्नाऽऽसीत् । यदा तु तस्य पुनर्वचनं रसायनमिव तस्याः श्रुतिमनुप्रविष्टं, तदा "पतिरागत" इति प्रमोद-मधिगत्यान्तः स्थित्वैव "अस्ति कश्चिद्वाग्विशेष ? " इति काकुस्वरेण तमपृच्छत् । सोऽपि तद्वाक्यवर्तिषु त्रिषु पदे-ष्वेकैकं पदं प्रथमपदं कृत्वा तद्घटितं काव्यत्रयं कुमारसंभव-मेघदूतरघुवंशाभिधानमनुपदं प्रणिनाय । सापि तदीयां रसनिष्यन्दिनीं वाणीं निशम्यानन्दपरवशा कवाटमुद्घाट्य तच्चरणयोर्निपत्य "क्षम्यतां दासीजनस्यापराध" इत्यभ्यर्थ-यामास । सोऽपि तामुत्थाप्य "न मे कोपलेशोऽप्यस्ती" त्यभिधाय मधुरवचनैस्सन्तोष्य तया सह सुखं सुचिरमा-

सीत्—इति । कालीभजनात्कालिदास इति संज्ञाऽस्य संजातेत्यस्मादैतिह्यादवसीयते । एतत्प्रणीतानि मालविकाग्निमित्र-विक्रमोर्वशीय-शाकुन्तलनामानि दृश्यकाव्यरत्नानि, निर्दिष्टपूर्वमेतदीयं श्रव्यकाव्यरत्नत्रयं च सहृदयहृदयान्यावर्जयन्ति । ऋतुसंहारपुष्पबाणविलासादिकमपि तेन प्रणीतमिति केचित्कथयन्ति । अप्पाशर्मविद्यावाचस्पतिस्तु स्वीयसंस्कृतचन्द्रिकायामेतत्काव्यविमर्शावसरे "कालिदासः श्रीरामायणमहाभारतादिसूक्तीः पुनः पुनः परिशील्यैव काव्यरत्नानि निर्मितवानस्यादि" ति "मालविकाग्निमित्रान्तिमपद्येन, नन्दवंश्यसेनापतेः पुत्रस्याग्निमित्रस्य कालिदासस्य चैककालावस्थितिरवगम्यत" इति च सप्रमाणं निरूपितवान् । ततश्च क्रिस्तोः प्राक्त्रयोदश्यां शताब्द्यां कालिदासस्यावस्थितिर्निश्चीयते । "उपमा कालिदासस्ये" ति वादः पुनस्तदीयकाव्यपरामर्शे समुचित एवेति प्रतिभाति । रसनिष्यन्दिनां प्रबन्धरत्नानां निर्माणेन रसिककुलस्य परमानन्ददायी कविकुलकोकिलोऽयं सबहुमानमनुदिनमनुस्मरणीयः ॥

———

LESSON XIV (चतुर्दशः पाठः)

भवभूतिः ।

रसमयरूपकत्रितयनिर्मातृत्वेन जगति परिगणितेषु कालिदासभवभूतिश्रीहर्षाभिधानेषु महाकविष्वयमेव द्वितीयो भवन्सहृदयानानन्दयति । अयं च प्रायः क्रिस्तोः पश्चात्सप्तमस्य वत्सरशतकस्यान्ते कान्यकुब्जराजस्य यशोवर्मणस्सभामलंचकार । अस्य मातापितरौ जातुकर्णीनीलकण्ठौ । अस्य जन्मभूमिर्दक्षिणापथे पद्मपुरं नाम नगरम् । अयं किल महाकुलप्रसूतस्साङ्गवेदाध्यायी शास्त्रेषु सर्वेषु प्रवीणो यथार्थनाम्नो ज्ञाननिधेः शिष्य इत्यादिकं, एतदीयप्रबन्धादवगम्यते । अनेन प्रणीतानि रूपकाणि त्रीणि दृश्यन्ते । अन्योऽपि प्रबन्धः कविनाऽनेन निर्मितः स्यादिति श्रीमान्भण्डारकस्सोपपत्तिकं मालतीमाधवोपोद्धाते निरूपितवानस्ति । अनेन बाल्ये महावीरचरितं नाम वीररसप्रधानं नाटकं, यौवने शृङ्गाररसप्रधानं मालतीमाधवाभिधानं प्रकरणं च रचितं भवेत् । परिणतप्रज्ञेन तेन करुणविप्रलंभप्रधानमुत्तररामचरितं नाम नाटकं रचितं स्यादिति प्रबन्धक्रममाचक्षते विचक्षणाः । उत्तररामचरितं पुनस्सहृदयहृदयद्रावणविषये रसमयौ प्रबन्धावन्यावतिशेते । तत्रत्यस्य करुणरसमयस्य वाक्यस्य श्रवणे ग्रावाऽपि रुद्यात् । वज्रस्यापि हृदयं विदलेत् ।

एतदभिसन्धायैव "उत्तरे रामचरिते भवभूतिर्विशिष्यत" इत्युद्घुष्यते । अस्य श्रीकण्ठ इति पितृकृतं नाम। "साम्बा पुनातु भवभूतिपवित्रमूर्तिरि" ति पद्यनिर्माणाद्भवभूतिरिति नामधेयमस्मै सहृदयैर्दत्तमिति विमर्शका वदन्ति । रसमयानां प्रबन्धानां प्रणेता महाकविरयं सर्वथा समुपश्लोकनीयः ॥

LESSON XV (पञ्चदशः पाठः)

ययातिः ।

यति-ययाति-संयाति-आयाति-वियाति-कृतिसंज्ञा नहुषस्य षट्पुत्रा महाबलपराक्रमा बभूवुः । यतिस्तु राज्यं नैच्छत् । ययातिस्तु भूभृदभवत् । उशनसश्च दुहितरं देवयानीं वृषपर्वणः पुत्रीं शर्मिष्ठां च उपयेमे। अत्रानुवंशश्लोको भवति।

यदुं च दुर्वसुं चैव देवयानी व्यजायत ।
द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥

काव्यशापाच्चाकालेनैव ययातिर्जरामवाप, प्रसन्नशुक्रवचनाच्च स्वजरां संक्रमयितुं ज्येष्ठं पुत्रं यदुमुवाच, "वत्स ! त्वन्मातामहशापादियमकालेनैव जरा मामुपस्थिता । तामहं तस्यैवानुग्रहाद्भवतः सञ्चारयामि । एकं वर्षसहस्रमतृप्तो विषयेषु त्वद्वयसा विषयानहं भोक्तुमिच्छामि । नात्र भवता

प्रत्याख्यानं कर्तव्यमि" ति। स यदुर्नैच्छत्तां जरामादातुम्। तं च पिता शशाप, "त्वत्प्रसूतिर्न राज्यार्हा भविष्यति," इति। अनन्तरं दुर्वसुं द्रुह्युमनुं च पृथिवीपतिर्जराग्रहणार्थं स्वयौवनप्रदानाय च अभ्यर्थयामास। तैरप्येकैकेन प्रत्याख्यातस्तान् शशाप। अथ शर्मिष्ठातनयमशेषकनीयांसं पूरुं तथैवाह। स चातीव प्रवणमतिः सबहुमानं पितरं प्रणम्य महाप्रसादोऽयमस्माकमित्युदारमभिधाय जरां जग्राह, स्वकीयं च यौवनं स्वपित्रे ददौ। सोऽपि पौरवं यौवनमासाद्य धर्माविरोधेन यथाक्रमं यथाकालोपपन्नं यथोत्साहं विषयांश्चचार, सम्यक्च प्रजापालनमकरोत्। ततश्चैवमगायत्।

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १ ॥
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
एकस्यापि न पर्याप्तमिति मत्वा शमं व्रजेत् ॥ २ ॥
यदा न कुरुते भावं सर्वभूतेषु पापकम्।
समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ ३ ॥
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः।
तथाऽप्यनुदिनं तृष्णा मम तेषूपजायते।
या दुस्त्यजा दुर्मतिभिः या न जीर्यति जीर्यतः ॥ ४ ॥
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम्।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥ ५ ॥

इत्युक्त्वा ततः

पूरोः सकाशादादाय जरां दत्वा च यौवनम् ।
राज्येऽभिषिच्य पूरुं च प्रययौ तपसे वनम् ॥ ६ ॥

दिशि दक्षिणपूर्वस्यां दुर्वसुं च समादिशत् ।
प्रतीच्यां च तथा द्रुह्युं दक्षिणायां ततो यदुम् ॥ ७ ॥

उदीच्यां च तथैवानुं कृत्वा मण्डलिनो नृपान् ।
सर्वपृथ्वीपतिं पूरुं सोऽभिषिच्य वनं ययौ ॥ ८ ॥

LESSON XVI (षोडशः पाठः)

तृणावर्तः ।

एकदाऽऽरोहमारूढं लालयन्ती सुतं सती ।
गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् ॥ १ ॥

भूमौ निधाय तं गोपी विस्मिता भारपीडिता ।
महापुरुषमादध्यौ जगतामास कर्मसु ॥ २ ॥

दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रचोदितः ।
चक्रवातस्वरूपेण जहारासीनमर्भकम् ॥ ३ ॥

गोकुलं सर्वमावृण्वन्मुष्णंश्चक्षूंषि रेणुभिः ।
पूरयन्सुमहाघोरशब्देन च दिशो दश ॥ ४ ॥
मुहूर्तमभवद्गोष्ठं तमसा रजसा वृतम् ।
सुतं यशोदा नापश्यत्तस्मिन्न्यस्तवती यतः ॥ ५ ॥
नापश्यत्कश्चनात्मानं परं चापि विमोहितः ।
तृणावर्तविसृष्टाभिः शर्कराभिरुपद्रुतः ॥ ६ ॥
इति खरपवनचक्रपांसुवर्षे
सुतपदवीमबलाऽविलक्ष्य माता ।
अतिकरुणमनुस्मरन्त्यशोच-
द्भुवि पतिता मृतवत्सका यथा गौः ॥ ७ ॥
रुदितमनुनिशम्य तत्र गोप्यः
भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ।
रुरुदुरनुपलभ्य नन्दसूनुं
पवन उपारतपांसुवर्षयोगे ॥ ८ ॥
तृणावर्तः शान्तरयो वात्यारूपधरो हरन् ।
कृष्णं नभोगतो गन्तुं नाशक्नोद्भूरिभारभृत् ॥ ९ ॥
तमश्मानं मन्यमान आत्मनो गुरुमत्तया ।
गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकम् ॥ १० ॥
गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः ।
अव्यक्तरावो न्यपतत्सहबालो व्यसुर्व्रजे ॥ ११ ॥

तमन्तरिक्षात्पतितं शिलायां
विशीर्णसर्वावयवं करालम् ।
पुरं यथा रुद्रशरेण विद्धं
स्त्रियो रुदत्यो ददृशुः समेताः ॥ १२ ॥
आदाय मात्रे प्रतिहृत्य विस्मिताः
कृष्णं च तस्योरसि लम्बमानम् ।
तं स्वस्तिमन्तं पुरुषादनीतं
विहायसा मृत्युमुखात्प्रमुक्तम् ॥ १३ ॥
गोप्यश्च गोपाः किल नन्दमुख्याः
लब्ध्वा पुनः प्रापुरतीव मोदम् ।
अहो बतात्यद्भुतमेष रक्षसा
बालो निवृत्तिं गमितोऽभ्यगात्पुनः ॥ १४ ॥
हिंस्रः स्वपापेन विहिंसितः खलः
साधुः समत्वेन भयाद्विमुच्यते ।
किं नस्तपश्चीर्णमधोक्षजार्चनं
पूर्तेष्टदत्तमुतभूतसौहृदम् ।
यत्संपरेतः पुनरेव बालको
दिष्ट्या स्वबन्धून्प्रणयन्नुपस्थितः ॥ १५ ॥
दृष्ट्वाऽद्भुतानि बहुशो नन्दगोपो बृहद्वने ।
वसुदेववचो भूयो मानयामास विस्मितः ॥ १६ ॥

———

LESSON XVII (सप्तदशः पाठः)

धौम्यशिष्योपाख्यानम् ।

PART I

कश्चिदृषिर्धौम्यो नाम आपोदः । तस्य शिष्यास्त्रयो बभूवुरारुणिरुपमन्युर्वेदश्चेति । स एकं शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास, "गच्छ, केदारखण्डं बधाने" ति । उपाध्यायेन संदिष्टः स आरुणिः पाञ्चाल्यस्तत्र गत्वा तत्केदारखण्डं बन्धुं नाशकत् । स क्लिश्यमानोऽपश्यदुपायं, "भवतु, एवं करिष्यामी" ति । स तत्र संविवेश केदारखण्डे । शयाने च तथा तस्मिंस्तदुदकं तस्थौ । ततः कदाचिदुपाध्याय आपोदो धौम्यः शिष्यावपृच्छत्, "क्व आरुणिः पाञ्चाल्यो गत" इति । तौ तं प्रत्यूचतुः, "भगवन् ! त्वयैव प्रेषितो 'गच्छ, केदारखण्डं बधाने' ति"। स एवमुक्तस्तौ शिष्यौ प्रत्युवाच, "तस्मात्तत्र सर्वे गच्छामो यत्र स गत" इति । स तत्र गत्वा तस्याह्वानाय शब्दं चकार, "भो आरुणे ! पाञ्चाल्य ! क्वासि ? वत्स ! एही" ति । स आरुणिरुपाध्यायवाक्यं श्रुत्वा तस्मात्केदारखण्डात्सहसोत्थाय तमुपाध्यायमुपतस्थे । प्रोवाच चैनं, "अयमस्म्यत्र केदारखण्डे निःसरदुदकमवारणीयं संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य केदारखण्डं

भवन्तमुपस्थितः । तदभिवादये भगवन्तम् । आज्ञापयतु भवान्कमर्थमहं करवाणी" ति । स एवमुक्त उपाध्यायः प्रत्युवाच, "यस्माद्भवान्केदारखण्डं विदार्योत्थितः, तस्मादुद्दालक एव नाम्ना भवान्भविष्यति । यस्माच्च त्वया मद्वचनमनुष्ठितं तस्माच्छ्रेयोऽवाप्स्यसि । सर्वे वेदा धर्मशास्त्राणि च ते प्रतिभास्यन्ती" ति । स एवमुक्त उपाध्यायेनेष्टं देशं जगाम ॥

LESSON XVIII (अष्टादशः पाठः)

धौम्यशिष्योपाख्यानम् ।

PART II

अथापरः शिष्यस्तस्यैवापोदस्य धौम्यस्योपमन्युर्नाम । तं चोपाध्यायः प्रेषयामास "वत्स, उपमन्यो! गा रक्षे" ति । स उपाध्यायवचनादरक्षद्गाः । स चाहनि गा रक्षित्वा दिवसक्षये गुरुगृहमागम्य उपाध्यायस्याग्रत स्थित्वा नमश्चक्रे । तमुपाध्यायः पीवानमपश्यत् । उवाच चैनं, "वत्स, उपमन्यो! केन वृत्तिं कल्पयसि? पीवाऽसि दृढमि" ति । स उपाध्यायं प्रत्युवाच, "भोः! भैक्ष्येण वृत्तिं कल्पयामी" ति । तमुपाध्यायः प्रत्युवाच, "मय्यनिवेद्य

भैक्ष्यं नोपयोक्तव्यमि" ति। तथेत्युक्तो भैक्ष्यं चरित्वा, उपाध्यायाय न्यवेदयत्। स तस्मादुपाध्यायः सर्वमेव भैक्ष्यमगृह्णात्। स तथेत्युक्तः पुनररक्षद्गाः। अहनि रक्षित्वा निशामुखे गुरुकुलमागम्य गुरोरग्रत स्थित्वा नमश्चक्रे। तमुपाध्यायस्तथाऽपि पीवानमेव दृष्ट्वोवाच, "वत्स, उपमन्यो! सर्वमशेषतस्ते भैक्ष्यं गृह्णामि। केनेदानीं वृत्तिं कल्पयसि?" इति। स एवमुक्त उपाध्यायं प्रत्युवाच, "भगवते निवेद्य पूर्वमपरं चरामि। तेन वृत्तिं कल्पयामी" ति। तमुपाध्यायः प्रत्युवाच, "नैषा न्याय्या गुरुवृत्तिः। अन्येषामपि भैक्ष्योपजीविनां वृत्त्युपरोधं करोषि। एवं वर्तमानो लुब्धोऽसी" ति। स तथेत्युक्त्वा गा अरक्षत्। रक्षित्वा च पुनरुपाध्यायगृहमागम्य, उपाध्यायस्याग्रत स्थित्वा नमश्चक्रे। तमुपाध्यायस्तथाऽपि पीवानमेव दृष्ट्वा पुनरुवाच, "वत्स, उपमन्यो! अहं ते सर्वं भैक्ष्यं गृह्णामि। न चान्यच्चरसि। पीवाऽसि भृशम्। केन वृत्तिं कल्पयसि?" इति। स एवमुक्तस्तमुपाध्यायं प्रत्युवाच, "भोः! एतासां गवां पयसा वृत्तिं कल्पयामी" ति। तमुवाचोपाध्यायः, "नैतन्न्याय्यं पय उपयोक्तुं भवतः। मया नाभ्यनुज्ञातमि" ति। स तथेति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्यायगृहमेत्य गुरोरग्रत स्थित्वा नमश्चक्रे। तमुपाध्यायः पीवानमेव दृष्ट्वोवाच, "वत्स, उपमन्यो! भैक्ष्यं

नाश्नासि। न चान्यच्चरसि। पयो न पिबसि। पीवाऽसि भृशम्। केनेदानीं वृत्तिं कल्पयसि?" इति। स एवमुक्त उपाध्यायं प्रत्युवाच, "भोः! फेनं पिबामि, यमिमे वत्सा मातॄणां स्तनात्पिबन्त उद्गिरन्ती" ति। तमुपाध्यायः प्रत्युवाच "एते त्वदनुकम्पया गुणवन्तो वत्साः प्रभूततरं फेनमुद्गिरन्ति। तदेतेषामपि वत्सानां वृत्त्युपरोधं करोष्येवं वर्तमानः। फेनमपि भवान्न पातुमर्हती" ति। स तथेति प्रतिश्रुत्य निराहारः पुनररक्षद्गाः। तथा प्रतिषिद्धो भैक्ष्यं नाश्नाति, न चान्यच्चरति, पयो न पिबति, फेनं नोपयुङ्क्ते। स कदाचिदरण्ये क्षुधाऽऽर्तोऽर्कपत्राण्यभक्षयत्। स तैरर्कपत्रैर्भक्षितैःक्षारतिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव। ततः सोऽन्धोऽपि चंक्रम्यमाणः कूपेऽपतत्।

अथ तस्मिन्ननागच्छति, सूर्ये चास्ताचलावलम्बिनि, उपाध्यायः शिष्यानवोचत्, "मयोपमन्युः सर्वतः प्रतिषिद्धः। स नियतं कुपितः। ततो नागच्छति चिरगतः। ततोऽन्वेषिष्यामी" ति। एवमुक्त्वा शिष्यैः सार्धमरण्यं गत्वा तस्याह्वानाय शब्दं चकार, "भो उपमन्यो! क्वासि? वत्स! एही" ति। स उपाध्यायस्याह्वानवचनं श्रुत्वा प्रत्युवाचोच्चैः, "अयमस्मिन्कूपे पतितोऽहमि" ति। तमुपाध्यायः प्रत्युवाच, "कथमस्मिन्कूपे पतितः?" इति।

स उपाध्यायं प्रत्युवाच, “ अर्कपत्राणि भक्षयित्वाऽन्धो भूतोऽस्मि । अतश्चंक्रम्यमाणः कूपे पतित ” इति । तमुपाध्यायः प्रत्युवाच, “ अश्विनौ स्तुहि । तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्तारावि ” ति । उपाध्यायेनैवमुक्तः स उपमन्युर्देवावश्विनौ ऋग्भिरस्तौत् । एवं तेनाभिष्टुतावश्विनावाजग्मतुः । आहतुश्चैनं, “ प्रीतौ स्वः । एष तेऽपूपः । अशानैनमि ” ति । स एवमुक्तः प्रत्युवाच, “ नानृतमूचतुर्भगवन्तौ । न त्वहमेतमपूपमुपयोक्तुमुत्सहे गुरवेऽनिवेद्ये ” ति । ततस्तमश्विनावूचतुः, “ आवाभ्यां पुरस्ताद्भवत उपाध्यायेनैवमेवाभिष्टुताभ्यामपूपो दत्तः । उपयुक्तः स तेना निवेद्य गुरवे । त्वमपि तथैव कुरुष्व, यथा कृतमुपाध्यायेने ” ति । स एवमुक्तः प्रत्युवाच, “ एतत्प्रत्यनुनये भवन्तावश्विनौ । नोत्सहेऽहमनिवेद्य गुरवेऽपूपमुपयोक्तुमि ” ति । तमश्विनावाहतुः, “ प्रीतौ स्वस्तवानया गुरुभक्त्या । उपाध्यायस्य ते कार्ष्णायसा दन्ता भवतोऽपि हिरण्मया भविष्यन्ति । चक्षुष्मांश्च भविष्यसि । श्रेयश्चावाप्स्यसी ” ति । स एवमुक्तोऽश्विभ्यां लब्धचक्षुरुपाध्यायसकाशमागम्याभ्यवादयत् । सर्वमाचचक्षे च । स चास्मिन् प्रीतिमान्बभूव । आह चैनं, “ यथाऽश्विनावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसि । सर्वे च ते वेदाः प्रतिभास्यन्ति सर्वाणि च धर्मशास्त्राणी ” ति । एषा तस्यापि परीक्षोपमन्योः

अथापरः शिष्यस्तस्यैवापोदस्य धौम्यस्य वैदो नाम। तमुपाध्यायः समादिदेश, "वत्स, वैद! इहास्यतां तावन्मम गृहे कंचित्कालं, शुश्रूषुणा च भवितव्यम्। श्रेयस्ते भविष्यती" ति। स तथेत्युक्त्वा गुरुकुले दीर्घकालं गुरुशुश्रूषणपरः, गौरिव नित्यं गुरुणा धूर्षु नियोज्यमानः शीतोष्णक्षुत्तृष्णादुःखसहः सर्वत्राप्रतिकूलश्चाभवत्। तस्य महता कालेन गुरुः परितोषं जगाम। तत्परितोषाच्च श्रेयः सर्वज्ञतां चावाप॥

LESSON XIX (एकोनविंशः पाठः)

संवादः ।

(माळविकाग्निमित्रीये प्रथमोऽङ्कः)

(राजा, देवीपरिव्राजिके, विदूषकहरदत्तगणदासाश्च, यथार्हमुपविशन्ति।)

राजा—(परिव्राजिकां विलोक्य), भगवति! हरदत्तगणदासयोः परस्परं ज्ञानसंघर्षो जातः। तत्रभवत्या प्राश्निकपदमध्यासितव्यम्।

परिव्राजिका—(सस्मितं), अलमलमुपालम्भेन। पट्टणे सति ग्रामे रत्नपरीक्षा।

रा—मा मैवम्। पण्डितकौशिकी खलु भवती। पक्षपातिनावनयोरहं देवी च।

आचार्यौ—सम्यगाह देवः। मध्यस्था भगवती नौ गुणदोषौ परिच्छेत्तुमर्हति।

रा—तेन हि प्रस्तूयतां विवादः।

प—देव! प्रयोगप्रधानं हि नाट्यशास्त्रम्। किमत्र वाग्व्यवहारेण?

रा—कथं वा मन्यते देवी?

देवी—यदि मां पृच्छसि, तदेतयोर्विवाद एव न मे रोचते।

गणदासः—न मां देवी समानविद्यतः परिभवनीयमनुमन्तुमर्हति।

विदूषकः—भवतु, द्रक्ष्याम उरभ्रसंवादम्। किं मुधा वेतनदानेनैतयोः?

दे—ननु कलहप्रियोऽसि।

वि—मा तावत्। अन्योन्यकलहितयोर्मत्तहस्तिनोरेकतरस्मिन्ननिर्जिते कुत उपशमः?

रा—ननु स्वाङ्गसौष्ठवातिशयमनयोर्द्रष्टवती भगवती?

प—अथ किम्।

रा—अथेदानीमतः परं किमाभ्यां प्रत्याययितव्यम्?

प—तदेव वक्तुकामास्मि।

श्लिष्टा क्रिया कस्यचिदात्मसंस्था
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव॥

वि—श्रुतमार्याभ्यां भगवत्या वचनम्? एष पिण्डितार्थ उपदेशदर्शने निर्णयः।

हरदत्तः—परमभिमतं नः।

ग—देवि! एवं स्थितम्।

दे—यदा पुनर्मन्दमेधाविनी शिष्योपदेशं मलिनयति, तदा नन्वाचार्यस्य दोषः?

रा—देवि! एवमापद्यते। विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति।

दे—(स्वगतं) कथमिदानीम्। (गणदासं विलोक्य प्रकाशं) अलमार्यपुत्रस्योत्साहकारणं परिपूर्य। विरम निरर्थादारम्भात्।

वि—सुष्ठु भवती भणति। भो गणदास! सङ्गीतकोपदेशमारभ्य सरस्वत्युपायनमोदकानि खादमानस्य किं ते सुलभनिग्रहेण विवादेन?

ग—सत्यमयमेवार्थो देवीवचनस्य। श्रूयतामवसरप्राप्तमिदम्।

लब्धास्पदोऽस्मीति विवादभीरो-
स्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै
तं ज्ञानपण्यं वणिजं वदन्ति॥

दे—अचिरोपनीता ते शिष्या। अपरिनिष्ठितस्योपदेशस्य संदर्शनमन्याय्यम्।

ग—अत एव मे निर्बन्धः।

दे—तेन हि द्वावपि भगवत्या उपदेशं दर्शयतम्।

प—देवि! नैतन्न्याय्यम्। सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय।

दे—(जनान्तिकं) मूढे परिव्राजिके! मां जाग्रतीमपि सुप्तामिव करोषि। (इति सासूयं परावर्तते।)

(राजा देवीं परिव्राजिकायै दर्शयति।)

प—अनिमित्तमिन्दुवदने
किमत्रभवतः पराङ्मुखीभवसि।
प्रभवन्त्योऽपि हि भर्तृषु
कारणकोपाः कुटुम्बिन्यः॥

वि—ननु सकारणमेव। आत्मनः पक्षो रक्षितव्य इति। (गणदासं विलोक्य) दिष्ट्या कोपच्छलेन देव्या

परित्रातो भवान्। सुशिक्षितोऽपि सर्व उपदेशदर्शनेऽनिपुणो भवति।

ग—देवि! श्रूयताम्। एवं जनो गृह्णाति। तदिदानीं,
विवादे दर्शयिष्यामि क्रियासंक्रान्तिमात्मनः।
यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया॥

(इत्यासनादुत्थातुमिच्छति।)

दे—(स्वगतं) का गतिः। (प्रकाशं) प्रभवत्याचार्यः शिष्यजनस्य।

ग—चिरमपदे शङ्कितोऽस्मि। (राजानमवलोक्य), अनुज्ञातं देव्या। तदाज्ञापयतु देवः। कतमस्मिन्नभिनेयवस्तुन्युपदेशं दर्शयिष्यामि।

रा—यदादिशति भगवती।

प—किमपि देव्या मनसि वर्तते। ततः शङ्कितास्मि।

दे—भण विस्रब्धम्। प्रभविष्याम्यात्मनः परिजनस्य।

रा—मम चेति ब्रूहि।

दे—भगवति! भणेदानीम्।

प—शर्मिष्ठायाः कृतिं चतुष्पदोद्भवं छलिकं दुष्प्रयोज्यमुदाहरन्ति। तत्रैकार्थसंश्रयमुभयोः प्रयोगं पश्यामः। तावता ज्ञायत एवात्रभवतोरुपदेशान्तरम्।

आचार्यौ—यदाज्ञापयति भगवती।

वि—तेन हि द्वावपि वर्गौ प्रेक्षागृहे सङ्गीतरचनां कृत्वा

तत्रभवतो दूतं प्रेषयतम्। अथवा मृदङ्गशब्द एव न उत्थापयिष्यति।

ह—तथा (इत्युत्तिष्ठति)

(गणदासो देवीं विलोकयति)

दे—न खल्वहं जयप्रत्यर्थिन्यार्यस्य। (आचार्यौ प्रस्थितौ)

प—इतस्तावत्।

आचार्यौ—(परिवृत्य), इमौ स्वः।

प—निर्णयाधिकारे ब्रवीमि। सर्वाङ्गसौष्ठवाभिव्यक्तये विगतनेपथ्ययोः पात्रयोः प्रवेशोऽस्तु।

आचार्यौ—नेदमावयोरुपदेश्यम्। (इति निष्क्रान्तौ)

LESSON XX (विंशः पाठः)

संवादः।

(विक्रमोर्वशीये तृतीयोऽङ्कः)

(ततः प्रविशतो भरतशिष्यौ)

प्रथमः—पैलव! अग्निशरणान्महेन्द्रसदनमुपगच्छतोपाध्यायेन त्वमासनं ग्राहितः। अहं पुनरग्निशरणसंरक्षणार्थं स्थापितः। अतः खलु पृच्छामि "अपि गुरोः प्रयोगेणाराधिता देवसभे?" ति॥

द्वितीयः---गालव! न जानेऽहमाराधिता न वेति। तस्मिन्पुनस्सरस्वतीकृतकाव्यबन्धे लक्ष्मीस्वयंवरे तेषु तेषु रसान्तरेषूर्वशी तन्मय्यासीत् ॥

प्र---सदोषावसर इव ते वाक्यशेषः ॥

द्वि---तत्र, उर्वश्या वचनं प्रमादस्खलितमासीत् ॥

प्र---किमिति? ॥

द्वि---लक्ष्मीभूमिकया वर्तमानोर्वशी वारुणीभूमिकया वर्तमानया मेनकया पृष्टा "सखि! समागताः खलु त्रैलोक्येश्वरास्सकेशवा लोकपालाः?। तेषु कतमस्मिंस्ते भावावेशः?" इति ॥

प्र---ततस्ततः ॥

द्वि---तस्याः पुरुषोत्तम इति भणितव्ये पुरूरवसीति निर्गता वाणी ॥

प्र---भवितव्यतानुविधायीनि बुद्धीन्द्रियाणि। किं तामभिक्रुद्धो मुनिर्भरतः? ॥

द्वि---शप्तोपाध्यायेन। महेन्द्रेण पुनरनुगृहीता ॥

प्र---किमिव? ॥

द्वि---"येन ममोपदेशस्त्वया लङ्घितः, तेन ते दिव्यस्थानं न भविष्यती" त्युपाध्यायसकाशादस्याश्शापः। सा पुनश्शापावसाने महेन्द्रेण लज्जावनतमुखी भणिता "यस्मिन्बद्धभावाऽसि, तस्य मे रणसहायस्य राजर्षेः प्रियङ्करिणी

तमेवोपतिष्ठ, यावत्स दृष्टसन्तानो भविष्यती" ति ॥

प्र—सदृशं पुरुषान्तरवेदिनो महेन्द्रस्य ॥

द्वि—(सूर्यमवलोक्य) कथं कथाप्रसङ्गेनातिक्रान्ताऽभिषेक-वेलोपाध्यायस्य!। एह्यस्य पार्श्ववर्तिनौ भवावः ॥

प्र—तथा (इति निष्क्रान्तौ)

॥ लेखः ॥ I

"स्वस्ति, उज्जयिनीतः परममाहेश्वरो महाराजाधिराजो देवस्तारापीडः सर्वसंपदामायतनं चन्द्रापीडमुत्तमाङ्गे चुम्बन्नन्दयति। कुशलिन्यः प्रजाः। किं तु कियानपि कालो भवतो दृष्टस्य गतः। बलवदुत्कण्ठितं नो हृदयम्। देवी च सहान्तःपुरैर्ग्लानिमुपनीता। अतो लेखवाचनविरतिरेव प्रयाणकालतां नेतव्या" इति ॥

(कादम्बर्याम्)

॥ लेखः ॥ II

स्वस्ति यज्ञशरणात्सेनापतिः पुष्पमित्रो विदेशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति। विदितमस्तु। योऽसौ राजसूयदीक्षितेन मया राजपुत्रशतपरिवृतं

गोप्तारं वसुमित्रमादिश्य संवत्सरोपावर्तनीयो निर्गळस्तुरगो विसृष्टः, स सिन्धोर्दक्षिणे रोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः । तत उभयोः सेनयोर्महानासीत्संमर्दः ।

ततः परान्पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥

सोऽहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यम् ॥

(माळविकाग्निमित्रीये)

॥ लेखः ॥ III

स्वस्ति यथास्थानं कुतोऽपि कोऽपि कमपि पुरुषविशेषमवगमयति । अस्मत्प्रतिपक्षं निराकृत्य दर्शिता कापि सत्यता सत्यवादिना ।....एतेषां मध्ये केचिदरेः कोशदण्डाभ्यामर्थिनः केचिद्विषयेणेति । अलङ्कारत्रयं च सत्यवता यदनुप्रेषितं तदुपगतम् ।....वाचिकं चाप्ततमादस्माच्छ्रोतव्यमिति ।

वाचिकं च यथा—"एते मम वयस्याः पञ्च राजानस्त्वया सह समुत्पन्नस्नेहाः । ते यथा कुलूताधिपश्चित्रवर्मा मलयनगराधिपः सिंहनादः काश्मीरदेशनाथः पुष्कराक्षः सिन्धुराजः सिन्धुषेणः पारसीको मेघनाद इति । एतेषु

प्रथमगृहीतास्त्रयो राजानो मलयकेतोर्विषयमिच्छन्ति। अपरौ हस्तिबलं कोशं च। तद्यथा चाणक्यं निराकृत्य महाभागेन मम प्रीतिः समुत्पादिता तथैतेषामपि प्रथमभणितोऽर्थः संपादयितव्य" इति॥

(मुद्राराक्षसे)

॥ रघुवंशे ॥

॥ द्वादशः सर्गः ॥

निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान्।
आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि॥ १॥
तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा॥ २॥
सा पौरान्पौरकान्तस्य रामस्याभ्युदयश्रुतिः।
प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान्॥ ३॥
तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया।
दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः॥ ४॥
सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ।
उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ॥ ५॥
तयोश्चतुर्दशैकेन रामं प्राव्राजयत्समाः।
द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियम्॥ ६॥

पित्रा दत्तां रुदन् रामः प्राङ्महीं प्रत्यपद्यत ।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ॥ ७ ॥
दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥ ८ ॥
स सीतालक्ष्मणसखः सत्याद्गुरुमलोपयन् ।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः ॥ ९ ॥
राजाऽपि तद्वियोगार्तः स्मृत्वा शापं स्वकर्मजम् ।
शरीरत्यागमात्रेण शुद्धिलाभममन्यत ॥ १० ॥
विप्रोषितकुमारं तद्राज्यमस्तमितेश्वरम् ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥ ११ ॥
अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ १२ ॥
श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः ।
मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत्पराङ्मुखः ॥ १३ ॥
ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥ १४ ॥
चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयांचक्रे तमनुच्छिष्टसंपदा ॥ १५ ॥
स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे ।
परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः ॥ १६ ॥

तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पितुः ।
ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते ॥ १७ ॥
स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीम् ।
नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक् ॥ १८ ॥
दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ।
मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत् ॥ १९ ॥
रामोऽपि सह वैदेह्या वने वन्येन वर्तयन् ।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥ २० ॥
प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम् ।
कदाचिदङ्के सीतायाः शिश्ये किंचिदिव श्रमात् ॥ २१ ॥
ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ।
प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥ २२ ॥
तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः ।
आत्मानं मुमुचे तस्मादेकनेत्रव्ययेन सः ॥ २३ ॥
रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः ।
आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ ॥ २४ ॥
प्रययावातिथेयेषु वसन् ऋषिकुलेषु सः ।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ॥ २५ ॥
बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिषिद्धाऽपि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ॥ २६ ॥

अनसूयातिसृष्टेन पुण्यगन्धेन काननम् ।
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदम् ॥ २७ ॥
संध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥ २८ ॥
स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे ॥ २९ ॥
तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीम् ।
गन्धेनाशुचिना चेति वसुधायां निचख्नतुः ॥ ३० ॥
पञ्चवट्यां ततो रामः शासनात्कुम्भजन्मनः ।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव ॥ ३१ ॥
रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्ता व्यालीव मलयद्रुमम् ॥ ३२ ॥
सा सीतासंनिधावेव तं वव्रे कथितान्वया ।
अत्यारूढो हि नारीणामकालज्ञो मनोभवः ॥ ३३ ॥
कलत्रवानहं बाले कनीयांसं भजस्व मे ।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम् ॥ ३४ ॥
ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनन्दिता ।
साऽभूद्रामाश्रया भूयो नदीवोभयकूलभाक् ॥ ३५ ॥
संरम्भं मैथिलीहासः क्षणसौम्यां निनाय ताम् ।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥ ३६ ॥

फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम् ।
मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम् ॥ ३७ ॥
इत्युक्त्वा मैथिलीं भर्तुरङ्के निविशतीं भयात् ।
रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत ॥ ३८ ॥
लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम् ।
शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति ताम् ॥ ३९ ॥
पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥ ४० ॥
सा वक्रनखधारिण्या वेणुकर्कशपर्वया ।
अङ्कुशाकारयाङ्गुल्या तावतर्जयदम्बरे ॥ ४१ ॥
प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधम् ।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवम् ॥ ४२ ॥
मुखावयवलूनां तां नैर्ऋता यत्पुरो दधुः ।
रामाभियायिनां तेषां तदेवाभूदमङ्गलम् ॥ ४३ ॥
उदायुधानापततस्तान्दृप्तान्प्रेक्ष्य राघवः ।
निदधे विजयाशंसां चापे सीतां च लक्ष्मणे ॥ ४४ ॥
एको दाशरथिः कामं यातुधानाः सहस्रशः ।
ते तु यावन्त एवाजौ तावांश्च ददृशे स तैः ॥ ४५ ॥
असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥ ४६ ॥

तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ।
क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः ॥ ४७ ॥
तैस्त्रयाणां शितैर्बाणैर्यथापूर्वविशुद्धिभिः ।
आयुर्देहातिगैः पीतं रुधिरं तु पतत्त्रिभिः ॥ ४८ ॥
तस्मिन्रामशरोत्कृत्ते बले महति रक्षसाम् ।
उत्थितं ददृशेऽन्यच्च कबन्धेभ्यो न किंचन ॥ ४९ ॥
सा बाणवर्षिणं रामं योधयित्वा सुरद्विषाम् ।
अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी ॥ ५० ॥
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम् ।
तेषां शूर्पणखैवैका दुष्प्रवृत्तिहराभवत् ॥ ५१ ॥
निग्रहात्स्वसुराप्तानां वधाच्च धनदानुजः ।
रामेण निहितं मेने पदं दशसु मूर्धसु ॥ ५२ ॥
रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥ ५३ ॥
तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यताम् ।
प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्तिभिः ॥ ५४ ॥
स रावणहृतां ताभ्यां वचसाऽऽचष्ट मैथिलीम् ।
आत्मनः सुमहत्कर्म व्रणैरावेद्य संस्थितः ॥ ५५ ॥
तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः ।
पितरीवाग्निसंस्कारात्परा ववृतिरे क्रियाः ॥ ५६ ॥

वधनिर्धूतशापस्य कबन्धस्योपदेशतः ।
मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ ॥ ५७ ॥
स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥ ५८ ॥
इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेरुरार्तस्य रामस्येव मनोरथाः ॥ ५९ ॥
प्रवृत्तावुपलब्धायां तस्याः संपातिदर्शनात् ।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥ ६० ॥
दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥ ६१ ॥
तस्यै भर्तुरभिज्ञानमङ्गुलीयं ददौ कपिः ।
प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः ॥ ६२ ॥
निर्वाप्य प्रियसंदेशैः सीतामक्षवधोद्धतः ।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः ॥ ६३ ॥
प्रत्यभिज्ञानरत्नं च रामायादर्शयत्कृती ।
हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ॥ ६४ ॥
स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः ।
आनन्दाश्रुपरीताङ्गः प्रियासंलापजं सुखम् ॥ ६५ ॥
श्रुत्वा रामः प्रियोदन्तं मेने तत्संगमोत्सुकः ।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥ ६६ ॥

स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः ।
न केवलं भुवः पृष्ठे व्योम्नि संबाधवर्त्मभिः ॥ ६७ ॥
निविष्टमुदधेः कूले तं प्रपेदे विभीषणः ।
स्नेहाद्राक्षसलक्ष्म्येव बुद्धिमाविश्य चोदितः ॥ ६८ ॥
तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः ।
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ॥ ६९ ॥
स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥ ७० ॥
तेनोत्तीर्य पथा लङ्कां रोधयामास पिङ्गलैः ।
द्वितीयं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥ ७१ ॥
रणः प्रववृते तत्र भीमः प्लवगरक्षसाम् ।
दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः ॥ ७२ ॥
पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ।
अतिशस्त्रनखन्यासः शैलरुग्णमतङ्गजः ॥ ७३ ॥
अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनाम् ।
सीतां मायेति शंसन्ती त्रिजटा समजीवयत् ॥ ७४ ॥
कामं जीवति मे नाथ इति सा विजहौ शुचम् ।
प्राङ्मत्वा सत्यमस्यान्तं जीविताऽस्मीति लज्जिता ॥ ७५ ॥
गरुडापातविश्लिष्टमेघनादास्त्रबन्धनः ।
दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवाभवत् ॥ ७६ ॥

ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम् ।
रामस्त्वनाहतोऽप्यासीद्विदीर्णहृदयः शुचा ॥ ७७ ॥
स मारुतिसमानीतमहौषधिहृतव्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः ॥ ७८ ॥
स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम् ।
मेघस्येव शरत्कालो न किंचित्पर्यशेषयत् ॥ ७९ ॥
कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः ।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः ॥ ८० ॥
अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ॥ ८१ ॥
इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥ ८२ ।
निर्ययावथ पौलस्त्यः पुनर्युद्धाय मन्दिरात् ।
अरावणमरामं वा जगदद्येति निश्चितः ॥ ८३ ॥
रामं पदातिमालोक्य लङ्केशं च वरूथिनम् ।
हरियुग्यं रथं तस्मै प्रजिघाय पुरंदरः ॥ ८४ ॥
तमाधूतध्वजपटं व्योमगङ्गोर्मिवायुभिः ।
देवसूतभुजालम्बी जैत्रमध्यास्त राघवः ॥ ८५ ॥
मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदम् ।
यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषाम् ॥ ८६ ॥

अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥ ८७ ॥
भुजमूर्धोरुबाहुल्यादेकोऽपि धनदानुजः ।
ददृशे ह्ययथापूर्वो मातृवंश इव स्थितः ॥ ८८ ॥
जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम् ।
रामस्तुलितकैलासमरातिं बह्वमन्यत ॥ ८९ ॥
तस्य स्फुरति पौलस्त्यः सीतासंगमशंसिनि ।
निचखानाधिकक्रोधः शरं सव्येतरे भुजे ॥ ९० ॥
रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ॥ ९१ ॥
वचसैव तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः ।
अन्योन्यजयसंरम्भो ववृधे वादिनोरिव ॥ ९२ ॥
विक्रमव्यतिहारेण सामान्याभूद्द्वयोरपि ।
जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव ॥ ९३ ॥
कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः ।
परस्परशरव्राताः पुष्पवृष्टिं न सेहिरे ॥ ९४ ॥
अयः शङ्कुचितां रक्षः शतघ्नीमथ शत्रवे ।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ॥ ९५ ॥
राघवो रथमप्राप्तां तामाशां च सुरद्विषाम् ।
अर्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीसुखम् ॥ ९६ ॥
अमोघं संदधे चास्मै धनुष्येकधनुर्धरः ।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥ ९७ ॥

तद्व्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखम् ।
वपुर्महोरगस्येव करालफणमण्डलम् ॥ ९८ ॥
तेन मन्त्रप्रयुक्तेन निमेषार्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम् ॥ ९९ ॥
बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ।
रराज रक्षःकायस्य कण्ठच्छेदपरम्परा ॥ १०० ॥
मरुतां पश्यतां तस्य शिरांसि पतितान्यपि ।
मनो नातिविशश्वास पुनःसंधानशङ्किनाम् ॥ १०१ ॥
अथ मदगुरुपक्षैर्लोकपालद्विपाना-
मनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय ।
उपनतमणिबन्धे मूर्ध्नि पौलस्त्यशत्रोः
सुरभि सुरविमुक्तं पुष्पवर्षं पपात ॥ १०२ ॥
यन्ता हरेः सपदि संहृतकार्मुकज्य-
मापृच्छ्य राघवमनुष्ठितदेवकार्यम् ।
नामाङ्करावणशराङ्कितकेतुयष्टि-
मूर्ध्वं रथं हरिसहस्रयुजं निनाय ॥ १०३ ॥
रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे संगमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥ १०४ ॥

“सत्ये सर्वं प्रतिष्ठितम्”